वल्लभदेवविरचिता - मेघदूतविवृतिः

१. यस्य भृङ्गावलिः कण्ठे दानाम्भाराजिराजिते ।
भाति रुद्राक्षमालेव स नः पायाद् गणाधिपः ।

२. कालिदासवचः कुत्र? व्याख्यातारो वयं क्व च? ।
तदिदम् मन्ददीपेन राजवेश्म प्रकाशनम् ।।

३. तथापि क्रियतेऽस्माभिर्मेघदूतस्य पञ्चिका ।
उन्नताश्रयमाहात्म्यस्वरूपख्याति लालसैः ।।

अथ यदेतद्भवान् व्याचष्टे किमेतद् उच्यते - मन्त्रदूतश्रवणाद्यभावान् महाकाव्यमपि खण्डकाव्यवन्न भवति । तथाख्यायिकाव्यपदेशस्तु दूरापेतत्वात्र । प्रावृडाश्रयः प्रवासविप्रलम्भः कवेर्वर्णयितुमिष्टोऽत्र । स च नायकमनाश्रित्य वर्ण्यमानस्तथा रसवत्तां न धारयति । न च शृंगारविधानम् । गुह्यकोऽत्र नायक तयाश्रितः । तस्य च विरहोन्मत्तत्वाद् दत्ये मेघप्रेरणमपि नायुक्तमिति केलिकाव्यमित्येतत् सर्वं स्वस्थम् ।

कश्चित् ..... ।।१।।

कश्चिद्यक्षः पुण्यजनो रामगिर्याश्रमेषु चित्रकूटाचलतपोवनेषु वसतिं चक्रे व्यधात् । निजपुरीमलकामपहाय तत्र वासे कारणमाह । भर्तुः प्रभोर्धनदस्य शापेनास्तंगमितमहिमा नष्टतेजाः । कीदृशेन । कान्ताविरहगुरूणा प्रियाविरहदुःसहेन। तथा वर्षभोग्येण संवत्सरमनुभाव्येन । किमिति तेनास्य शापोऽदायीत्याह । स्वाधिकारप्रमत्तो निजव्यापारावलिप्तः । स हि जायायां व्यसनित्वात्स्वामधिकार-मनपेक्षमाणो राजराजेन । ''तयैव तव वर्षं विरहोऽस्तु । महिमा ते नस्यत्विति'' शप्तः। रामाद्रिमतः स आययौ । कीदृशेष्वश्रमेषु । जनकतनयास्नानपुण्योदकेषु सीतामज्ञ-नपवित्रतोयेषु । यदध्यासितमर्ह द्भिस्तद्धि तीर्थं प्रचक्षते । राघवसंनिधानेऽपि सीतायाः प्रशंसा शृङ्गाराश्रयत्वेन काव्यस्य चिकीर्षितत्वात् । तथा स्निग्धा अपरुषाश्छाया-प्रधानास्तरवो येष्विति सेव्यत्वकथनम् । वर्षं भोग्यो वर्षभोग्यः 'काला अत्यन्तसंयोगे चेति' (२-१-२८,२९) समासः । रामगिरिरत्र चित्रकूटः । न तु ऋष्यमूकः । तत्र सीताया वासाभावात् । सर्वत्र मन्दाक्रान्ता वृत्तम् । प्रवासविप्रलम्भो रसः । ।।१।।

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः .... ।।२।।

ततोऽसौ यक्षः कतिचित्सप्ताष्टान्मासान्नीत्वातिवाह्य तस्मिन्नद्रौ चित्रकूटे मेघं

ददर्शालोकितवान् । अबलाविप्रयुक्तः प्रियाविरहितः । अतश्च दौर्बल्यात्कनकवलयभ्रंशेन सौवर्णकटकपातेन रिक्तप्रकोष्ठः शून्यभुजः । कामी व्यसनी। कीदृशम् । आश्लिष्टसानुमालिङ्गताद्रिप्रस्थम् । अतश्च वप्रकीडार्थं तटाघातकेलिनिमित्तं परिणतो दत्तप्रहारो यो गजस्तद्वत्प्रेक्षणीयं दृश्यम् । सानुलग्नेभनिभमित्यर्थः । कदा । आषाढस्य प्रशमदिवसे समाप्तिदिने ग्रीष्मावसाने । केचित्तु शकारथकारयो र्लिपिसारूप्यमोहात् 'प्रथम' इत्यूचुः कथं कथमपि चैतमेवार्थं प्रतिपन्नाः । वर्षाकालस्य प्रस्तुतत्वादादिदिनमित्येतत्त्वतीव विरुद्धम् । ।।२।।

तस्य स्थित्वा .... ।।३।।

तस्य जीमूतस्य पुरोऽग्रतः कथमपि स्थित्वा राजराजस्य वैश्रवणस्यानुचरो भृत्योऽन्तर्बाष्पोऽस्रुकण्ठः किमप्यज्ञायमानं वस्तु चिरं दध्यावचिन्तयत् । कीदृशस्य । केतकाधानहेतोः केतकाख्यपुष्पजननकारणस्य । प्रावृषि तेषामुद्भवात् । अथ जलददर्शनमात्रेण कस्मादस्यान्तर्बाष्पत्वं ध्यानं चेत्याह । सुखिनोऽप्यवियुक्तस्यापि मेघालोके वर्षाकाले चेतोऽन्यथावृत्ति सविपर्ययमनल्पोत्कण्ठासंकुलम् । किं पुनः कण्ठाश्लेष-प्रणयिनि प्रियतमाख्ये जने दूरवर्तिनि सति । वर्वासमयमागतमवलोक्य स्वस्था अपि यत्रोत्कण्ठन्ते तत्र विरहिणां का कथेत्यर्थः । कण्ठाश्लेष एव प्रणयोऽर्थिता विद्यते यस्य । मेघा आलोक्यन्ते यस्मिन्निति वर्षाः । स्वरूपात्प्रच्युतावस्थमन्यथावृत्ति।।

प्रत्यासन्ने नभसि ..... ।।४।।

ततोऽसौ गुह्यकस्तस्मै मेघाय स्वागतं व्याजहार । शोभनमागतं तेऽस्त्वित्यब्रवीत्। प्रीतिप्रमुखाणि स्नेहपूर्वकाणि वचनानि यत्र स्वागते तद्यथा । ''भद्र स्वस्थोऽसि । कुशलं ते सर्वत्र । विश्रम्यताम् । पवित्रीक्रियतामिदं स्थानमिति। कीदृशोऽसौ । जीमूतेन मेघेन स्वकुशलमयीमात्मश्रेयोरूपां प्रवृत्तिं वार्त्तां हारयिष्यन्नायीष्यन्। यतोऽसौ दयिताया जीवितालम्बनं प्राणसंधारणमर्थयते । भर्तृकल्याणाधिगमाद्धि प्रियतमानां समाश्वासो जायते । कीदृशाय तस्मै । सरसैः कुटजकुसुमैः कल्पितार्घाय विहितपूजाय । अत एवासौ प्रीतः । अषाढस्य प्रशमदिवस इति य एवार्थ उक्तः स एव प्रत्यासन्ने नभसीत्यनूदितः । नभाः श्रावणः । यदि वा जलदनिचितत्वात्प्रत्यासन्ने निकटवर्तिनीव नभसि गगन इति व्याख्येयमिति केचित् । गगन एव जीमूतो वार्त्तां नयति । स हि प्रीतिं कुर्वन्नाययति । प्रीत्या हारयिष्यन्निति णिजुत्पत्तिः । ततो लृट् 'शेषे चेति' (३-३-१३) चकारात्क्रियार्थायामुपपदे लृट् । प्रवृत्तिं हारयितुं स्वागतं व्याजहारेत्यर्थः । जीमूतेनेति 'हृक्रोरन्यतरस्यामिति' (१-४-५३) पक्षे यथाप्राप्तं कर्तृत्वम् । तस्मा इति 'क्रियया यमभिप्रैति स संप्रदानमिति' (१-४-३२ ग) संप्रदानवचनम् । ।।४।।

धूमज्योतिःसलिलमरुतां.... ॥५॥

गुह्यकः पुण्यजन औत्सुक्यादुत्कण्ठावशादित्येवमपरिगणयन्न विमृशंस्तं मेघं ययाचे प्रार्थयत । किमित्याह । क्व मेघः क्व संदेशार्था वार्त्तावस्तूनि । मेघस्तावद्धूमज्योतिः सलिलमरूतां समुदायः । धूमादिमयान्यचेतनानि ह्यभ्राणि । संदेशार्थाः पटुकरणैश्चतुरेन्द्रियैः प्राणिभिर्मानवैः प्रापणीया नेतुं शक्याः । न तु निर्बुद्धिभिः । कथं तह्यैतदसौ न विमृष्टवानित्याह । यस्माद्ये कामार्ता मदनवागुरापीडितास्ते चेतनाचेतनेषु सिंहपादपादिषु प्रणयकृपणाः प्रार्थनादीना भवन्ति । न हि ते विषयमविषयं वा विवेक्तुं समर्था इति भङ्ग्या कविः स्वदोषं निरस्यति ।॥५॥

जातं वंशे भुवनविदिते ..... ॥६॥

यतस्त्वामहमेवंविधं वेदातोऽहं प्रार्थित्वं प्राप्तः । कीदृशम् । पुष्करावर्तकानां प्रलयमेघानां वंशे कुले जातमिति कुलीनत्वोक्तिः । तथा मघोन इन्द्रस्य प्रकृतिपुरुषममात्यपुरुषमिति प्रभावकथनम् । प्रकृतिषु ह्यमात्याः प्रधानभूताः । इन्द्रस्य च मेघा एव प्रियकराः । प्रकृतिषु प्रकृतिश्चासाविति वा पुरुषः प्रकृतिपुरुषः। ''स्वाम्यमात्यौ च राष्ट्रं च कोशो दुर्गं वलं सुहृत् । सप्त प्रकृतयो ह्येताः सप्ताङ्गं राज्यमुच्यते ॥'' (मनु -९-२९४) कामरूपं मनोज्ञं स्वेच्छारूपं वा । बहुरूपत्वान्मेघानाम्। तदेव वक्ष्यति । पुष्पमेघीकृतात्मेति । अत एव विधिवशादहंदूरबन्धुरसंनिहित दारस्त्वय्यर्थित्वं गतो याच्ञाकरः संपन्नः । यदोवंगुणयुक्तोऽहं तर्हि किसित्येतावता मय्यर्थनेत्याह । यस्मादधिगुणे कुलादिगुणोत्कृष्टे पुरुषे याच्ञा वन्ध्या निष्फला वरं भद्रम् । अलज्ञावहत्वात् । त्वधमे निकृष्टे लब्धकामा प्राप्तेष्टार्थापीति । भिन्नलिङ्गत्वेऽपि सामान्योपक्रमात्सामाना- धिकरण्यम् । यथा वरं कूपशताद्वापीत्यादौ । ॥६॥

संतप्तानां त्वमसि शरणं.... ॥७॥

हे पयोद संतप्तानामम्बुदानेन त्वं यदा शरणं त्राणं भवसि तन्ममापि विरहसंतप्तस्य संदेशं वार्त्तां प्रियायाः सकाशं हर नय प्रापय । धनपतिक्रोधविश्लेषित-स्येति संतप्तत्वप्रतिपादनम् । क्व मया गन्तव्यमित्याह । गुह्यकाधिपानां वसतिरलका नाम पुरी ते गन्तव्या यातव्या । न च सा दुर्ज्ञानित्याह । बाह्योद्याने कैलासोपवने । बाह्यं च तदुद्यानं च । तत्र स्थितो यो हरस्तस्य शिरश्चन्द्रिकया धौतानि हर्म्याणि यत्र सा दिनेऽपि विक्षालितसौधा । त इति ''कृत्यानां कर्तरि वा'' (२-३-७१) ॥७॥

त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः .... ॥८॥

वातमार्गं खमुद्गतं भवन्तं पान्थाङ्गना विरहिण्योऽलकानुत्क्षिप्य द्रक्ष्यन्ति । यतः प्रत्ययान्निश्चयोत्पादनादाश्वसन्त्यः । अयं जीमूत उदितः । अत्रावश्यमस्मत्प्राणेश्वरैरागन्तव्यमिति । तद्दर्शनमात्रे कस्मादाशाकृतेत्याह । त्वयि संनद्धे कृतोद्योगे सति वियोगाकुलां प्रेयसीं क उपेक्षेत विरहयेत् । यद्यन्योऽपि जनस्तादृशो न स्यात् । कीदृशः । मादृशः पराधीनवृत्तिः । अथ वा कोऽन्यो जनो जायामुपेक्षेतेत्यत्र संबन्धः। स्वाधीना हि कान्ताभिः सह रममाणाः प्रावृषमतिवाहयन्ति । संनद्धादयः शब्दा एवमादावौपचारिकाः । ॥८॥

आपृच्छस्व प्रियसखममुं.... ॥९॥

अमुं शैलं चित्रकूटमालिङ्ग यापृच्छस्व सोत्कण्ठं ज्योक्कुरु । यतः प्रियसखमिष्टमित्रम् । मेघानां ह्यद्रयः सुहृदः । ततस्तेषामुदयात् । सखा च गमनकाले ज्योक्क्रियते । कीदृशममुम् । तुङ्गमुन्नतम् । तथा सर्वजनपूज्यै रामपदै रामपादैर्मेखलासु नितम्बभागेष्वङ्कितं मुद्रितमिति पावनत्वोक्तिः । सखिधर्ममाह । यस्याद्रेः काले काले सर्वस्मिन्समागमसमये त्वया सह संयोगमेत्य चिरविरहजमुष्णं वाप्पमूष्माणं त्यजतः स्नेहव्यक्तिर्भवति । यः स्निह्यतीत्यर्थः । पर्वता हि जलदवृष्ट्या स्निग्धा भवन्ति बाष्पं च मुञ्चन्ति । एतदेव सुहृत्त्वं यच्चिरेण सख्यौ दृष्टे वाष्पस्नेहौ जायेते । आपृच्छस्वेत्याङि नुप्रच्छ्योरित्यात्मनेपदम् । प्रियश्चासौ सखा चेति प्रियसखः । राजाहःसखिभ्यष्टच् (५-४-९१)। संयोगमेत्येति वाष्पमोक्षापेक्षं पौर्वकाल्यं स्नेहक्रियापेक्षं वा । ॥९॥

मन्दं मन्दं नुदति.... ॥१०॥

यथेदं शुभमीक्ष्यते तथा निश्चितं नेत्रसुन्दरं त्वामाकाशे बलाकाः सेविष्यन्ते श्रयिष्यन्ते । किमितोत्याह । हितो वातो यथा त्वां मन्दं मन्दं प्रेरयति यथा चायं चातको मयूरो मधुरं कूजति । वामो वामपार्श्वस्थो वल्गुवादी वा । तोयगृध्नुर्जलमभिलाषुकः। वार्षिकलिङ्गदर्शनाद्बलाका अप्यायस्यन्तीति प्रावृड्धर्मोऽयम्। कीदृश्यस्ताः । गर्भाधानेन स्थिरः । परिचयो यासां ताः । मेघगर्जितेन हि ताः सगर्भा भवन्तीति वार्त्ता । आबद्धमाला रचितपङ्क्तयः । मन्दं मन्दं इत्याधिक्ये द्वित्वम्

तां चावश्यं दिवसगणनातत्परामेकपत्नी ... ॥११॥

तां भ्रातृजायां मित्रभार्यां निश्चितमव्यापन्नाममृतामीक्षिष्यसे । कीदृशीम् । दिवसगणनातत्पराम् । कियान्कालो गतः । कियाञ्शेष इत्यवधिगणनापरायणाम् ।

यत एकपत्नीं पतिव्रताम् । एकः पतिर्यस्याः सा ताम् । एवंविधां चेत्कथं तर्ह्यव्यापन्नामित्याह । यस्मान्नारीणां प्रियविरहे हृदयमाशाबन्धः प्रायेण रुणद्ध्यवलम्बते। यतः कुसुमसदृशम् । अत एव सद्यः पातप्रणयि तत्क्षणविनाशोन्मुखम् । एवंविधमप्याशया धार्यते । नूनमस्माकं पुनः प्रियेण संयोगो भावीति । आशाबन्ध आशाबन्ध इव । यथाशाबन्धो जालकारकृततन्तुनिकरः कुसुममपि शुष्कं वातेरितं रुन्धे । चशब्दः पूर्ववाक्यापेक्षया समुच्चये । एवमन्यत्र । प्रणयः प्रीतिसन्मुखता । एकपत्नीमिति नित्यं सपत्न्यादिष्विति (४-१-३५) ङीब्नकारौ । भ्रातृजायाशब्दे ऋतो विद्यायोनिसंबन्धेभ्य (६-३-२३) इत्यलुगभावश्चिन्त्यः । ॥११॥

कर्तुं यच्च प्रभवति महीमुच्छि..... ॥१२॥

तत्त्वदीयं ध्वनितमाकर्ण्य तव राजहंसा अनुचराः कैलासाद्रिपर्यन्तं भविष्यन्ति। यतो मानसोत्का मानसोन्मनसः । प्रावृषि हि ते शरणार्थं तत्र यान्ति । किं तद्गर्जितमित्याह । यन्महीमवनिमुच्छिलिन्ध्रामुद्भूतशिलिन्ध्राख्यकुसुमां विधातुं प्रभवति शक्नोति । तानि हि मेघगर्जितेन जायन्ते । अत एव तदवन्ध्यं सफलम् । श्रवणसुभगं कर्णसुखकारीति चाटुपदम् । कीदृशा हंसाः। बिसानां किसलयानि तेषां छेदः खण्डः स एव पाथेयमध्वभोजनं विद्यते थेषां ते तथोक्ताः । बिसकिसलयच्छेदैर्वा पाथेयवन्त इति विग्रहः। आ कैलासादित्यव्ययीभावो विभाषितः (२-१-१३)। ॥१२॥

मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुकूलं .... ॥१३॥

हे जलद मम गदतोऽध्वानं तावद्भवद्गमनहितमाकर्णय । तदनन्तरं श्रोत्रपेयं कर्णानन्दनं संदेशं श्रोष्यसि निशमयिष्यसि । कीदृशं मार्गमित्यानुकूल्यमाह । खिन्नः खिन्न इति श्रान्तः संस्त्वं यत्र मार्गेऽद्रिषु पदं न्यस्य क्रमं निक्षिप्य गन्तासि यास्यसि क्षीणप्रायश्च नदीनामगुरु तोयमुपयुज्य पीत्वा शीघ्रं यास्यसि ? पानविश्रामो हि पथि सुतरामुपयुज्येते । तदनुतदुपरीत्यादयः पूर्वकविप्रयोगदर्शनात्साधवः । अव्ययेन हि षष्ठीसमासो निषध्यते (२-२-११)। श्रोत्रपेयमिति कृत्यैरधिकार्थवचने (२-१-३३)। खिन्नः खिन्न इत्यादावाधिक्ये द्वित्वमिति (८-१-११) कर्मधारयवत्त्वात्सुब्लुग्न भवति। आधिक्ये च द्वित्वमाम्रेडितमिति महत्या संज्ञया (८-१-२) ज्ञापितम् । गन्तासीति लुट् । परिलघ्विति क्रियाविशेषणम् । ॥१३॥

अद्रेः शृङ्गं हरति.... ॥१४॥

मार्गप्रारम्भमाह - अस्मात्प्रदेशात्त्वमुत्तराभिमुखः खमुद्गच्छ । सरसा निचुला वेतसा यत्रेति प्रावृड्वर्णनम्। त्वं कीदृशः। चकितचकितं सत्रासमुद्धक्त्राभिर्मुग्धसिद्ध

वधूभिरित्थं दृष्टोत्साहो दृष्टोद्यमः । कथमित्याह । पवनो वायुः किं स्विदचलशिखरं हरत्यपनयति । अतश्च पातशङ्कया चकितत्वम् । अत एव मुग्धत्वम् । किं कुर्वन्। दिङ्नागानामाशाकरिणं पथि स्थूलहस्तावलेहान्महाकरग्रहान्वर्जयन् । ते हि तं प्रतिद्विरदभ्रान्त्या ग्रहीतुमिच्छन्ति । दिङ्नागाश्च पातालादारभ्य । यदाह । मन्दाकिन्याः पयः शेषं दिग्वारणमदाविलम् । तथा । नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे । चकितचकितमिति प्रकारे द्वित्वम् (८-१-१२)। ।।१४।।

रत्नच्छायाव्यतिकर इव.... **।।१५।।**

एतत्पुरस्तादग्रे वल्मीकाग्रात्पिपीलकोत्खातमृत्कूटप्रान्तादाखण्डलस्येन्द्रस्य धनुष्खण्डं चापैकदेशः प्रभवत्युत्पद्यते । सर्पगर्भं वल्मीकमिति सुरचापस्य प्रावृषि प्रभव इत्यागमः । कीदृशं तत् । अनेकवर्णत्वाद्रत्नच्छायाव्यतिकर इव बहुविधमणिकान्तिसंपर्कवत्प्रेक्षणीयं रम्यम् । येन च तव कृष्णं शरीरमतितरां कान्तिमापत्स्यते । यथा वल्लवरूपस्य हरेः प्रसरत्कान्तिना पिञ्छेन वपुः कान्तिमाप्तवत्। गोपा हि प्रायेण शबरवन्मयूरपिञ्छधारिणः । प्रसङ्गाच्च वर्षावर्णनमपि कविना क्रियत इति मार्गोपदेशेऽपि नास्य श्लोकस्यानवसरः । व्यतिकरो मिश्रीभावः । धनुष्खण्ड इति नित्यं समास (८-३-४५) इति षत्वम् । ।।१५।।

त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः ... **।।१६।।**

मालमुद्वारं क्षेत्रं किंचिन्मनागारुह्य पश्चादनन्तरमुत्तरेणोत्तरस्यां दिशि भूयो बहुतरं गतिं प्रवलय व्यावर्तय । मालं हि दक्षिणाशास्थं तेन चोत्तराशा गन्तव्येति गतिप्रवलनम्। मालारोहणं वृष्ट्या वधूप्रीत्यर्थम् । मालेन हि तदुपरिभवमाकाशं लक्ष्यते । कीदृशस्त्वम् । वृष्टिदानात्त्वय्यायत्तं कृषिफलमित्यतो हेतोर्जनपदवधूलोचनैः पीयमानः साभिलाषं दृश्यमानः । कीदृशैः । ग्राम्यत्वाद्भ्रूविलासानभिज्ञैः। अत एव प्रीतिवशात्स्निग्धैररूक्षैः । कीदृशं मालम् । सद्यस्तत्क्षणं सीरेण हलेन यदुत्कषणं विलेखनं तेन सुरभि सुगन्धि । हलोत्कृष्टा हि भूर्जलदजलकणव्यतिकरात्सुरभिर्भवति। प्रवलनं स्फिरणम् । उत्तरेणेत्येनबन्तः (५-३-३५) । ।।१६।।

त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना .... **।।१७।।**

अध्वश्रमेण परिगतं व्याप्तं भवन्तं सानुमानद्रिराम्रकूटो मूर्ध्ना शृङ्गेण साधु सम्यग्वक्ष्यति धारयिष्यति । यत आसारेण प्रशमितवनोपप्लवस्त्वम् । त्वया ह्यस्य वेगवर्षेण दावाग्निर्निर्वापितः । किमित्येतावता शिरसा वहनमित्याह । न क्षुद्रोऽपीत्यादि। संश्रयाय वासार्थं सुहृद्यायाते सति क्षुद्रोऽपि दुर्जनोऽपि विमुखो न भवति । किं

पुनर्यस्तथा तेन प्रकारेणोच्चैरुन्नतः । कुतः । प्रथमसुकृतापेक्षया । आदावेतेन मे महदुपकृतम् । इदानीमेतस्याहं प्रत्युपकरोमीति पूर्वोपकारप्रत्यालोचनया न पराङ्मुखीभावः । क्षुद्रः खलो ह्रस्वश्च । उच्चैः प्रांशुर्महामनाश्च । वक्ष्यतीति वहे रूपम्। सानुमान्पर्वतः । तथेत्यनेनोच्चैस्त्वस्य प्रसिद्धिमाह । ॥१७॥

छन्नोपान्तः परिणतफलद्योतिभिः .... **॥१८॥**

त्वयि शृङ्गमुन्नते सत्याम्रकूटोऽचलो निश्चितं सुरयुगलालोकनीयां रम्यां दशामापत्स्यते। यतः परिणतफलद्योतिभिः पक्काम्रशोभिभिर्वनाम्रवृक्षैश्छन्नोपान्तश्छादित-पर्यन्तः । त्वमपि स्निग्धवेणीसवर्णोऽरूक्षकेशकलापकालः । अतश्च कृष्णचूचुकः समस्तपीतश्च महीकुच इवेत्युपमा । अत एव देवद्वंद्वदर्शनम् । ॥१८॥

स्थित्वा तस्मिन्वनचरवधूभुक्तकुञ्जे..... **॥१९॥**

अश्वमुखादीनां वनेचराणां कान्ताभिः सेवितगहने तत्राद्रौ क्षणं स्थित्वा तदनन्तरं वर्त्म मार्गमवतीर्णस्त्वं रेवां नर्मदामालोकयिष्यसि। कीदृशीम् । उपलविषमे विन्ध्याद्रेः पादेऽधोभागे विशीर्णां विक्षिप्ताम् । अतश्च भक्तिच्छेदैर्विच्छित्तिविभागैर्दत्तां गजवपुषि भूतिं सुधामिवेत्युपमा। तोयोत्सर्गेण जलत्यागेन द्रुततरा चतुरा गतिर्यस्येति वर्त्मतरणे कारणम् । वनचरशब्दे न सप्तम्या अलुक् । बाहुलकात् (६-३-१४)।

तस्यास्तिक्तैर्वनगजमदैर्वासितं .... **॥२०॥**

तस्या रेवाया जलमादाय गृहीत्वा त्वं यायाः । यतो वान्तवृष्टिरुन्मृष्टतोयः। कीदृशं जलम् तिक्तैः कटुकैर्वनगजमदैर्वासितं सुरभीकृतम् । विन्ध्यो हि गजावासः । तथा तीरजेन जम्बूषण्डेन जम्बूवनेन प्रतिहतरयं जडीकृतवेगमिति सुग्रहत्वोक्तिः । रेवा हि वेगगामिनी । अनेन गुणमाह । हे घनाम्भःपानादन्तःसारं परिपूर्णं सन्तं मारुतस्त्वां तुलयितुं परिच्छेत्तुं न प्रभविष्यति । यस्मात्सर्व एव कश्चिद्रिक्तः शून्योऽर्थरहितो लघुर्भवत्यवमानास्पदत्वं याति। पूर्णता तु गौरवाय भवति। आढ्यो हि सर्वेणाद्रियते। तेन तव जलेन गुरुत्वे सति नानिलात्परिभवप्राप्तिः। ॥२०॥

नीपं दृष्ट्वा हरितकपिशं ...... **॥२१॥**

जललवमुचस्तोयकणवर्षिणस्तव सारङ्गा मयूरा मार्गं सूचयिष्यन्ति चिह्नैरूहिष्यन्ते। नूनमनेन पथास्मत्सुहृज्जीमूत आयात इति । तैर्हि मेघात्तोयकणाः पातव्या इति तदनुसरणम् । स्वादादिहृतचित्तत्वाद्व्रजंश्चासौ तैर्न लक्षित इति मार्गोन्नयनम्। किं कृत्वा सूचयिष्यन्तीति चिह्नान्याह । अर्धं रूढैः सामिपक्कैः केसरैर्हरितकपिशं

नीलपिङ्गं नीपं कुसुमं दृष्ट्वा । तद्धि वर्षासु नवजलपातं विना न जायते । तथाविर्भूतप्रथममुकुला उत्पन्नाद्यकोरकाः कन्दलीलता अनुकच्छं तीरससीपे दृष्ट्वा । ता हि वर्षासु फुल्लन्ति । तथा दग्धारण्येषु निदाघप्लुष्टकाननेष्वधिकसुरभिं गन्धं पृथिव्या आघ्राय शिङ्घित्वा । जलकणपाताद्धि तत्र सौगन्ध्याविर्भावः । जललवमुच इति मेघविशेषणं न तु जसन्तम् । ॥२१॥

उत्पश्यामि द्रुतमपि सखे ...... **॥२२॥**

अस्मद्धितार्थं त्वरितमपि जिगमिषोस्तव ककुभकुसुमसुगन्धी सर्वस्मिन्नद्रौ तवाहं कालहारमुत्पश्याम्युत्प्रेक्षे । कुत इत्याह । यस्मात्प्रियमित्रैः शुक्लापाङ्गैर्मयूरैः सनयनजलैर्नेत्रोदकयुक्तैः केकाः स्वागतीकृत्य वाग्भिः स्वागतं कृत्वा प्रत्युद्गत इत्युक्तिप्रत्युक्तिवशात्कालक्षेपः । अतश्चार्थये त्वाम् । अस्मदर्थं कथमपि भवान्गन्तुं व्यवसेद्व्यायामं कुर्यात् । अहमार्तस्त्वं चोन्नत इति भावः । सनयनजलत्वमत्र चिरेण मित्रालोकनात् । ॥२२॥

पाण्डुच्छायोपवनवृतयः केतकैः ..... **॥२३॥**

त्वयि निकटे सति दशार्णाख्या जनपदा एवंविधाः संपत्स्यन्ते भविष्यन्ति । कीदृशाः? केतकैः पुष्पैः पाण्डुच्छायाः शुक्लशोभा उपवनवृतय उद्यानकण्ठ्यो येषाम्। सितत्वात्केतकानाम् । सूच्या गर्भकण्टकेन भिन्नैर्विदारितैः । तेषां ह्यन्तःस्था सूचिर्भित्त्वा विनिर्याति । तथा गृहबलिभुजां काकानां नीडारम्भैरालयक्रमैराकुलानि व्याप्तानि ग्रामचैत्यानि येषु । वर्षभयाद्धि पक्षिणः प्रावृषि नान्यत्र निर्यान्ति । चैत्यं बुद्धालयः। यदि वा महाभोगप्रज्ञाततमो वनस्पतिश्चैत्यः । तथा फलानां परिणत्या पाकेन श्यामा जम्बूवनान्ता यत्र । कपित्थानीव हि जम्बूफलानि पाकेन श्यामायन्ते । कतिपयदिनस्थायिनश्च हंसा येषु । मेघालोके मानसगमनात् । ॥२३॥

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानी..... **॥२४॥**

तेषां दशार्णानां विदिशख्यां राजधानीं गत्वा तत्क्षणमविकलं परिपूर्णं कामुकत्वस्य फलं त्वं लब्धा प्राप्स्यसि । कुत इत्याह । यद्यस्माद्वेत्रवत्याः सरितस्तदेवंविधं पयः पास्यसि । कीदृशम् । तीरोपान्ते स्तनितेन पक्षिकूजितेन स्खलितेन वा सुभगं सुन्दरं स्वादु रुच्यं चलोर्मि स्खलितवीचि । अत एव सभ्रूभेदेन मुखेन तुल्यम् । अत एव कामित्वफललाभः । कामी हि कामिन्याः कुटिलभ्रु वक्त्रं स्वादु धयति । ऊर्मीणां भ्रुव उपमानम् । यदिति हेतुपदम् । तदिति पयोनिर्देशः । विदिशाशब्दः पृषोदरादिः (६-३-१०९)। लक्षणं नाम । लब्धेति तृन्नन्तः । ॥२४॥

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो.... **॥२५॥**

तत्र विदिशायां नीचैराख्यमद्रिं विश्रामार्थं त्वमधिवसेरधितिष्ठेराश्रयेः । कीदृशम्? प्रौढपुष्पैर्विकसितकुसुमैः कदम्बतरुभिर्हेतुभिस्तव सुहृदः संश्लेषात्पुलकितमिव रोमाञ्चितमिव । फुल्लस्य हि कदम्बकुसुमस्य रोमशोभा जायते । केचित्त्वप्रौढेति पेठुर्मुकुलितत्वाच्च पुलकाकारतामाहुः । यश्चाद्रिर्नागराणां विदग्धानामुद्दामानि प्रचण्डानि यौवनानि शिलावेश्मभिः प्रख्यापयति । यतः पण्यस्त्रीरतिपरिमलोद्गारिभिर्गणिका-सुरतामोदमोदिभिः । विश्रामशब्दः कवीनां प्रमादजः ॥२५॥

विश्रान्तः सन्व्रज वननदीतीरजातानि सिञ्च...... **॥२६॥**

तत्र विश्रान्तः सन्ननन्तरं त्वं यायाः । किं कुर्वन् । वननदी काननसरिन्नदी-विशेषो वा । तत्कूले भवान्युपवनानां यूथिकाजालकानि हरिणीगुल्मान्नवजलकणैरुक्षन्। पुष्पलावीमुखानां मालाकाराङ्गनामुखानां छायादानाद्धेतोः क्षणमात्रं परिचितः सुहृत्। तापापहरत्वात् । कीदृशानां मुखानाम् । कपोलयोर्यः स्वेदो घर्मस्तस्यापनयनेनोत्पुं-सनेन या रुजा बाध उपमर्दस्तया क्लान्तकर्णोत्पलानां म्लानश्रवणकुवलयानाम् । रुजात्रोत्पलानामेव । भिदादित्वादङ् । पुष्पाणि लुनन्तीति पुष्पलाब्यः । कर्मण्यण् (३-२-१) ॥२६॥

वक्रः पन्था यदपि भवतः ..... **॥२७॥**

कौबीरीमाशां तव यियासोरुज्ञयिनीं प्रति यद्यपि वक्रः पन्थाः कुटिलोऽध्वा तथाप्युज्ञयिन्याः सौधोत्सङ्गप्रणयविमुखो हर्म्याङ्कोपभोगवितृष्णो मा भूः । अवश्यं गच्छेरित्यर्थः । यस्यात्तत्र नागरिकाणां नेत्रविभ्रमैर्यदि न रमसे न क्रीडसे तद्वञ्चितोऽसि। द्रष्टव्यादर्शनात् । कीदृशैः । विद्युद्दामस्फुरितचकितैः शम्पागुणविलसनत्रस्तैः । तथा लोलापाङ्गैश्चटुलपर्यन्तैः । ॥२७॥

वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः ..... **॥२८॥**

इदानीमुज्ञयिनीमार्गोपदेशमाह - निर्विन्ध्याख्या नदी । तस्याः पथि प्रवाहे संनिपत्य संश्लिष्य रसाभ्यन्तरो भव पानीयगर्भः स्याः । अपः पिबेरित्यर्थः । अथ च रसाभ्यन्तरः शृङ्गारवासितो भवेरिति वक्रोक्तिः । तां कामयेथा इत्यर्थः । कामिनीसाधर्म्यमाह । कीदृश्यास्तस्याः? वीचिक्षोभेण कल्लोलकम्पेन स्तनिता कोकूयमाना या विहगश्रेणी पक्षिमाला सैव काञ्चीगुणो रशनादाम यस्याः । तथाश्मादौ स्खलितेन परिलुठितेन सुभगं सुन्दरं संसर्पन्त्या वहन्त्याः । तथा दर्शितावर्त एव नाभिर्यया तस्याः । आह्वानाभावे कथं मम रागिता युक्तेत्याह । नारीणां विभ्रमो

विलास एव यस्मात्प्रियेषु प्रणयवचनं प्रार्थनावचः प्रीतिवाक्यं वा । यदालोकनवशादङ्गनानां विभ्रमाः प्रवर्तन्ते तैरेवासावभ्यर्थितो भवेत् । साक्षात्तु तासां प्रार्थना लाघवकारिणी । अत्र चावर्तनाभि-दर्शनादिको विलासः प्रवृत्त एव ।

वेणीभूतप्रतनुसलिलां तामतीतस्य सिन्धुं ..... ॥२९॥

हे सुभग! तां निर्विन्ध्यां कार्श्यं कर्तृ येन विधिना प्रकारेण प्रकृतिस्थं त्यजति स विधिर्भवतैव संपाद्यः । वर्षैस्तत्रेत्यर्थः । एवं हि तोयपूरागमान्नदी कृशा न भवति । कस्मात्कार्श्यत्यागाय तत्र वर्षामीत्याह । यतस्तवातितस्य विरहावस्थया सौभाग्यं वाल्लभ्यं व्यञ्जयन्तीं कथयन्तीम् । तथा हि त्वद्विरहेण वेणीभूतं प्रतनुत्वात्सलिलं यस्याः। वेणी केशपाशः । तथा तटरुहेभ्यस्तीरजेभ्यस्तरुभ्यो भ्रष्टैर्जीर्णपर्णैर्जर्जरकिसलयैः पाण्डुरीभूताम् । प्रियविरहे हि नारीतनुः पाण्डुश्च भवति । ॥२९॥

प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धा .... ॥३०॥

ततोऽवन्तिन्नाम जनपदानासाद्य पूर्वोद्दिष्टां पूर्वोक्तां नगरीमुज्ञयिनीमनुसर गच्छ । कीदृशांस्तान् । उदयनकथा बृहत्कथा वत्सराजवृत्तान्तः । तत्र कोविदाः प्रवीणा ग्रामवृद्धाश्चिरन्तना येषु । तस्य तत्र वर्णनीयत्वात् । पुरीं कीदृशीम्? श्रिया ऋद्ध्या विशालामनल्पां विविधाश्च शाला यस्यास्ताम् । यां चोत्प्रेक्षामहे । दिव एकं भास्वरं खण्डमिव । स्वर्गैकदेशस्य कस्तत्रागम इत्याह । स्वर्गिणां पुण्यवतां सुचरितफले सुकृतफल उपभुक्तत्वादल्पीभूते किंचिच्छिष्टे सति गां गतानां भुवं प्राप्तानां पुण्यशेषेणाहृतं भुवमानीतं मूर्तिमत्स्वर्गखण्डमिवेत्यर्थः । अवन्तीनां निवासो जनपदोऽवन्तयः । ॥३०॥

दीर्घीकुर्वन्पटु मदकलं कूजितं सारसानां .... ॥३१॥

यत्रोज्ञयिन्यां कामिनीनां सिप्रासरिदनिलः सुरतग्लानिं मोहनखेदं हरत्यपास्यति। कीदृशः? सारसानां लक्ष्मणानां मदेन मधुरं स्फुटं च कूजितं दीर्घीकुर्वन्प्रसारयन् । तथा प्रभातेषु स्फुटितानि विकसितानि यानि कमलानि तेषामामोदः सौरभं तस्य मैत्र्या संपर्केण कषायः कषायरसयुक्तः । भावित इत्यर्थः । अङ्गानुकूलो गात्रसुखकारी। शीतलसुरभित्वात् । क इव हरतीत्याह । प्रार्थनया चाटुकारः प्रियकृत्प्रेयान्यथा कामिन्या अङ्गग्लानिमपहरति । सिप्राख्योज्ञयिन्यां नदी ॥३१॥

जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूमै .... ॥३२॥

भर्तुः कण्ठच्छविरिति गणैः ...... ॥३३॥

युगलकम् ॥

अस्या उज्ञयिन्याः सौधेष्वध्वखिन्नान्तरात्मा निशामतिवाह्य चण्डेश्वरस्य शंभोर्धामायतनं याया गच्छेः । कीदृशः? जालोद्गीर्णैर्गवाक्षविवरनिर्गतैरङ्गनामूर्धजो-पस्कारधूमैरुपचितवपुः पीवरतनुः । धूमप्रायत्वादभ्राणाम् । तथा गृहमयूरैः सुहृत्स्नेहाद्दत्तो वितीर्णो नृत्तमेवोपहारो बलिर्यस्य । ते हि त्वामालोक्य सुहृत्स्नेहान्नृत्यन्ति । कीदृशेषु हर्म्येषु? कुसुमैरुपकारपुष्पैः सुगन्धिषु । तथा ललितानां सविलामानां वनितानां पादानामलक्तकेनाङ्कितेषु चिह्नितेषु । त्वं कीदृशः? गणैः प्रीत्यालोक्यमानः । कुतः? भर्तुः शंभोः कण्ठच्छविर्गलनिभकान्तिरित्यतो हेतोः । कीदृशं धाम? पुण्यं पवित्रम् तथा गन्धवत्याख्याया नाद्या मरुद्भिर्वातैर्धूतोद्यानमुल्लसितोपवनम् । कीदृशैः? कुवलयरजोगन्धिभिरुत्पलरेणुसौरभं विद्यते येषां तैः । तथा तोयक्रीडायां जलकेलौ निरताः सक्ता या युवतयस्तासां स्नानेन तिक्तैः कटुकैः । अङ्गरागसंक्रमणात् ।

अप्यन्यस्मिञ्जलधर महाकालमासाद्य काले .... ॥३४॥

हे जलधरान्यस्मिन्नपि कालेऽवसरे महाकालाभिधानं भगवन्तमासाद्य तावत्त्वयासितव्यं यावदर्कश्चक्षुर्गोचरतां चक्षुर्दृश्यत्वमुपैति। प्रातःसंध्यासमयपर्यन्तमित्यर्थः। किमर्थमित्याह । शूलिनो महाकालस्य संध्याबल्यर्थं पटहतां पूर्यत्वं श्लाघनीयां विदधत्त्वमामन्द्राणां सर्वमधुराणां गर्जितानां परिपूर्णं फलं प्राप्स्यसि । देवानां हि बलिकाले ढक्कापटहादिवाद्यैर्भाव्यम् । तत्र तु भवद्ध्वनितान्येव पटहोभविष्यन्तीति तत्साफल्यम् । स्थातव्यं त इति कृत्यानां कर्तरि वा (२-३-७१)। ॥३४॥

पादन्यासक्वणित्तरशनास्तत्र लीलावधूतैः .... ॥३५॥

तत्र महाकालधाम्नि वेश्या भगवद्गणिकास्त्वत्तो भवत्सकाशान्नखपदसुख-करान्वर्षाग्रिविन्दून्प्रथमजलकणानासाद्य प्रीतिवशात्त्वयि भ्रमरपाणिपृथुलान्कटाक्षान्क्षेप्स्यन्ति। कीदृश्यस्ताः । पादन्यासेन क्वणितरशनरणन्मेखलाः । तथा विलासवलितैर्वालव्यजनैः खिद्यमानकरा इति सौकुमार्योक्तिः । ता हि देवं वीजयन्त्यः सेवन्ते । कीदृशैस्तैः । रत्नच्छाया खचिताः प्रकटीकृता वलय उदरलेखा यैः । तासां हि वासोयुगाच्छादितानां चामरमणिभासा मध्यवलयः प्रकटीभवन्ति । ॥३५॥

पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः .... ॥३६॥

पश्चादनन्तरं तत्र पशुपतेः शंभोर्नृत्तारम्भ आर्द्रगजाजिनेच्छां रुधिरसर सगजचर्माभिलाषं हर नाशय । तव तन्निभत्वात् । तथा हि कीदृशस्त्वंम्? उच्चैरुन्नतं भुजतरुवनं दोर्द्रुमषण्डं मण्डलेन तिर्यगभिलीनः संश्रितः । तथाभिनवजपापुष्पवल्लोहितं सांध्यं तेजो बिभ्रत् । एवं च नवगजाजिनसङ्गाहरणम् । भवान्या गौर्या

दृष्टभक्तिरालोकितेत्थंविधसेवनः ।कथम्? विद्युदुन्मेषाभावा-च्छान्तोद्वेगानि निवृत्तखेदान्यत एव स्तिमितानि नयनानि यत्र दर्शने । ।।३६।।

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं .... ।।३७।।

तत्रोज्ञयिन्यामभिसारिकाणां सौदामिन्या तडिता राजमार्गं दर्शय प्रकाशय । यतो नक्तं रात्रौ प्रियतमवसतिं व्रजन्तीनाम् । अत एवातिघनत्वात्सूच्या भेद्यैस्तमोभी रुद्धालोकेऽवष्टब्धप्रकाशे पथि । कीदृश्या तया । कनकनिकषवत्सुवर्णघर्षणवत्स्निग्धयारूक्षया । एवं च कृत्वा तोयोत्सर्गार्थं स्तनितेन गर्जितडम्बरेण मुखरः सशब्दो मा भूः । यतस्ता योषिद्भावात्कातरास्त्रस्नवः ।।३७।।

तां कस्यांचिद्भवनवलभौ सुप्तपारावतायां ..... ।।३८।।

तां पूर्वोक्तां रात्रिं कस्यामपि भवनवलभौ गृहोपरिपुरे नीत्वातिवाह्य ततः सूर्योदये भूयोऽपि भवान्मार्गमवशिष्टं वाहयेदुल्लङ्घयेत् । यस्मान्मित्राणां यैरर्थकृत्यं प्रयोजनमभ्युपेतमूरीकृतं शिरसाङ्गीकृतं ते न खलु मन्दायन्ते नैवालसा भवन्ति । कीदृश्यां वलभौ । सुप्ताः पारावताः कपोतविशेषा यत्र । ते हि कण्ठरुतश्रवणार्थं नागरकैर्गृहे धार्यन्ते । त्वं कीदृशः? चिरं विलसनात्खिन्नं श्रान्तं विद्युदेव कलत्रं भार्या यस्य सः । अत एव वलभौ विश्रमणम् । अमन्दो मन्दो भवति मन्दायते । भृशादित्वात्क्यङ् (३-१-१२)। अर्थश्चासौ कृत्यमर्थकृत्यम । अर्थः प्रयोजनम् । अवश्यकार्यत्वा-च्चास्य कृत्यत्वम् ।।३८।।

तस्मिन्काले नयनसलिलं योषितां खण्डितानां .... ।।३९।।

अतः कारणाद्भानोः सूर्यस्य वर्त्म मार्गं त्यज । माच्छादको भूरित्यर्थः । यतस्तस्मिन्काले प्रभाताख्ये खण्डितानां विप्रलब्धानामङ्गनानां प्रियैरागत्यास्रु नेत्रजलं शमनीयम् । यदि त्वमस्य पटनिभो भवसि तदालोकनपाटवाभावान्निशाशङ्क्या नागमनं स्यादिति वर्त्म भानोस्त्यज । किं च सोऽपि भानुः खण्डितायाः कमलिन्याः प्रियायाः कमलादेव वदनात्प्रालेयमवश्यायमेवास्रु हर्तुं शमयितुं प्रत्यावृत्तः प्रत्यागतः । तेनापि पद्मिन्याः प्रार्थना कार्येत्यर्थः । अतस्त्वयि कररुधि रश्मिरोधकेऽनल्पाभ्यसूयो भवेत्। त्वयि महान्तं रोषं भावयेत् । यस्य हि प्रियां प्रार्थयमानस्य यः करमवष्टभीयात्तस्य तत्र मन्युर्भवति । 'निद्राकषायमुकुलोकृतेत्या'दि । ।।३९।।

गम्भीरायाः पयसि सरितश्चेतसीव ..... ।।४०।।

गम्भीराख्यायाः सरितः पयसि प्रसन्ने तव स्वभावसुन्दरश्छायारूपोऽप्यात्मा

प्रतिबिम्बरूपश्चेतसीव प्रवेशं लप्स्यते । तस्मात्कारणादस्या नद्याः कैरवसितानि चपलशफरोद्वर्तनप्रेक्षितानि कम्पमानमीनस्फुरितावलोकितानि धैर्याद्गाम्भीर्यान्मोघीकर्तुं वन्ध्ययितुं नार्हसि । ततो मा गम इत्यर्थः । गमनाद्धि तानि निष्फलानि स्युः । यश्च नागरः स प्रेयस्यां रागेण वीक्षमाणायां विलम्बते । स हि तस्याश्चेतसि प्रविष्टः । ॥४०॥

तस्याः किंचित्करधृतमिव प्राप्तवानीरशाखं ... ॥४१॥

तस्या गम्भीराया नीलं सलिलसेव वसनसम्बरं पानवशाद्धृत्वापास्य तव लम्बमानस्य जलभरमन्थरत्वात्तत्रैव तिष्ठतः प्रस्थानं कथमपि भावि प्रयाणं कथमपि भविष्यति । यस्माद्यो ज्ञातास्वादोऽनुभूतरसः स पुलिनजघनां तीरपृथुनितम्बां युवतिं कस्त्यक्तुं समर्थः । त्वं च पानीयपानाद्विदितास्वादः । सापि पुलिनमेव जघनं यस्याः सा पुलिनजघना । कीदृशं सलिलवसनम् । प्राप्तं लब्धवद्वानीरशाखा वेतसीलताः । वानीरशाखाश्लिष्टमित्यर्थः । प्राप्तापन्ने च द्वितीयया । यदि वा प्रप्ता वानीरशाखा येनेति बहुव्रीहिः । अतश्चोत्प्रेक्षते । करधृतसिव हस्तावष्टब्धं यथा । अंशुकं हरतो हि कामिनो नार्यः कराभ्यां रुन्धन्ति । नीलं हरितम् । ग्रीष्मेऽल्पत्वात् । अतश्च हरणान्मुक्तमुत्सृष्टं रोधस्तीरसेव नितम्बो येन । यदप्यम्बरं ह्रियते तन्मुक्तनितम्बं भवति । भविष्यतीति भावि । ॥४१॥

त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसंपर्कपुण्यः ..... ॥४२॥

ततो देवगिरिमुपजिगमिषोर्यियासोस्तव सतुषारः पवनो नीचैर्वास्यति मन्थरं गमिष्यति । कीदृशः? तव निष्यन्देन तोयमोक्षेणोच्छ्वसिता विकसिता हृषिता यासौ वसुधा भूमिस्तस्या गन्धसंपर्केण सौरभव्यतिकरेण पुण्यो मनोज्ञः । तथा सौख्याद्दन्तिभिः पीयमानः । कथम् । स्रोतोरन्ध्रं करविवरं तस्य ध्वनितं शूत्कारस्तेन सुभगं रम्यम् । सशूत्कृतमित्यर्थः । सुषिरे हि वातप्रवेशादधिको ध्वनिर्भवाति । स्रोतः करः करिणः। यथाः प्रासप्रोतस्रोतसान्तःक्षतेनेति माघस्य (शिशु-१८-४९)। तथा कानने वन उदुम्बरफलानां परिणमयिता पाचयिता । तद्वशात्पाकोत्पत्तेः ॥४२॥

तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा .... ॥४३॥

तत्र देवगिरौ सदा संनिहितं कुमारं त्वं सुरसरिदुदकसरसैः कुसुमवर्षैः पुष्पमेघीकृतात्मत्वात्स्नपयेः पूजयेः । यस्माद्वासवीनां चमूनामैन्द्रीणां सेनानां रक्षार्थं नवशशिभृता चन्द्रमौलिनात्यादित्यं सूर्यादप्यधिकं तत्तेजो वीर्यं सुभृतं क्षिप्तम् । असुरोपद्रुतसुररक्षार्थं हि कार्त्तिकेयो हरेण गौर्यां जनित इत्यागमः । तच्च शुक्रं स्वस्थानचलितमग्निना पीतमभूत् । वासवीनामिति दुर्लभः प्रयोगः । वृद्धाच्छेनाणो

बाधितत्वात् (४-२-११०;१४)। अतिक्रान्त आदित्यो योन तदत्यादित्यम् ।।४३।।

ज्योतिर्लेखावलयि गलितं.... ।।४४।।

पश्चादनन्तरं पावकेः स्कन्दस्य तं वाहनं मयूरं गर्जितैर्नर्तयेथा लास्यं कारयेथाः। जलदरवनिशमनाद्धि वर्हिणो नृत्यन्ति । तमित्युक्तम् । कं तमित्याह । तच्च गलितं भ्रष्टं बर्हं पक्षं गौरी पुत्रप्रीत्या कर्णे करोत्यवतंसीकुरुते । तच्च कुवलयपदप्राप्युत्पल-स्थानारूढम् । ज्योतिर्लेखावलयं तेजोराजिमण्डलं विद्यते यस्य तत्तथोक्तम् । हरशशिरुचा शिवशिरश्चन्द्रचन्द्रिकया धौतापाङ्गं क्षालितनेत्रान्तम् । गर्जितैः कीदृशैः । अद्रिग्रहण-गुरुभिः पर्वतप्राप्तिपीवरैः । अद्रिग्रहणशब्दे न कर्तृषष्ठीसमासः (२-२-१५)। नर्तयेथा इति न पादमीत्यादिनात्मनेपदम् (१-३-८९) ।।४४।।

आराध्यैवं शरवणभुवं देवमुल्लङ्घिताध्वा .... ।।४५।।

शरवणभुवं कुमारमेवं पुष्पासारैः स्नपनादिप्रकारेणाराध्य किंचिच्चाध्वानामतिक्रम्य रन्तिदेवस्य राज्ञः कीर्तिं चर्मण्वत्याख्यां मानयिष्यन्पूजयितुं व्यालम्बेथाः श्रयेथा गच्छेः। कीदृशीम्? सुरभितनया गावस्तासामालम्भनं प्रोक्षणं ततो जातां प्रसूतां भुवि च स्रोतोमूर्त्या प्रवाहरूपेण परिणतां रूपान्तरं गताम् । तेन हि नृपेण क्रतुष्वतिबंहीयस्यो गावः संज्ञपिता यासां रुधिराच्चर्मभ्यश्च चर्सण्वती संपन्नेत्यागमः । त्वं कीदृशः? सिद्धमिथुनैस्तोयविन्दुत्रासान्मुक्तमार्गः परिहृतपथः । यतो वीणिभिर्वल्लकीहस्तैः । तन्त्रीर्हि जलार्द्रा विस्वरा भवति । अग्नेरासाद्य वीर्यं सोढुमक्षमया गङ्गया शरवणे त्यक्तमित्यतः शरजत्वं स्कन्दस्य । प्रनिरन्तःशरेक्षुप्लक्षेत्यादिना णत्वम् (८-४-५)।।४५।।

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे .... ।।४६।।

त्वयि तोयं ग्रहीतुमवनते लम्बमाने सति तस्याः सिन्धोश्चर्मण्वत्याः प्रवाहं सिद्धाख्या नभश्चराश्चक्षूंषि दूरमत्यर्थमावर्ज्य निक्षिप्य कौतुकाद्द्रक्ष्यन्ति । यतो भुवः स्थूलमध्येन्द्रनीलमेकं मुक्तागुणं मौक्तिकदामेव । स्रोतसो मुक्तागुणनिभत्वादम्बुदस्य च महानीलतुल्यत्वात् । कीदृशं प्रवाहम्? पृथुमपि तनुं विस्तीर्णमपि स्वल्पम् । कुतः? दूरभावाद्धिप्रकर्षात् । दूराद्धि महदपि स्वल्पं दृश्यते । अत एव मुक्तागुणसारूप्यम् त्वयि कीदृशे? सजलत्वात्कृष्णस्य वर्णचौरे नीले। एतेनेन्द्रनीलनिभत्वमुक्तम्। ।।४६।।

तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां ..... ।।४७।।

तां चर्मण्वतीमतीत्य दशपुराख्ये नगरे युवतिनयनकौतुकानामात्मानं पात्रीकुर्वंस्तासां नेत्रविषयं नयनूगच्छेः । दशपुरनिकटेन याया यथा तन्नागरिकामीक्षेर-

न्नित्यर्थः । कीदृशानाम्? नागरिकत्वात्परिचिता अभ्यस्ता भ्रूशाखाविलासा येषाम् । तथा त्वदालोकनवशात्पक्ष्मोत्क्षेपेणोपरि विलसन्ती स्फुरन्ती कृष्णशारप्रभा येषाम् । अतश्च कुन्दकुसुमस्य यः क्षेपः प्रेरणं तस्यानुगा अनुयायिनो ये भ्रमरास्तेषां श्रियं शोभां मुष्णन्ति यानि तेषाम् । कुन्दानां सितत्वादलीनां च कालत्वात् । यद्यपि कौतूहलविशेषणान्येतानि तथापि वस्तुबलात्तद्वतां नेत्राणामेवैते गुणाः । ।।४७।।

ब्रह्मावर्तं जनपदमधश्छायया गाहमानः ..... ।।४८।।

ततो ब्रह्मावर्ताख्यं जनपदमधश्छायया प्रतिबिम्बेन सुस्पृशंस्तत्कुरुक्षेत्रं यायाः। कीदृशम्? क्षत्रप्रधनपिशुनं राजन्यकसमरसूचकम् । अद्यापि शरशकलाद्यालोकनात् । यत्र च क्षत्रियाणां तीक्ष्णशरशतैरर्जुनो वदनान्यभ्यषिञ्चत्संधुक्षयामास निर्भरीचकार । भवानिव जलवृष्टिभिर्नलिनानीति शारबाहुल्यकथनम् । ।।४८।।

हित्वा हालामभिमतरसां रेवतीलोजनाङ्कां ..... ।।४९।।

हे सौम्य! दर्शनीय! तासां सरस्वतीसंबन्धिनीनामपामभिगमं सेवनं विधाय निश्चेतनस्त्वमप्यन्तः स्वच्छोऽभ्यन्तरनिर्मलो भविता भविष्यसि । केवलं वर्णमात्रेण कृष्णः काल इति महापुण्यत्वोक्तिः । अथ च वस्तुस्वभाव एवैष यन्मेघानां पानीयपानाद्बहिःकृष्णत्वमिति । तासामित्युक्तम् । कासामित्याह या अपो लाङ्गली हलधरी हालां सुरां हित्वोपेक्ष्य सिषेवे भेजे । बन्धूनां कुरुपाण्डवानां प्रीत्या वैमुख्यरक्षया। स हि तैर्योद्धुमर्थितः । द्वयेऽपि मे बान्धवाः । तत्कुत्र व्रजामीति विचार्य वेश्म त्यक्त्वा सारस्वततीर्थयात्रामकरोत् । हालात्यागेन नियमग्रहणं तीर्थसेवने प्रतिपादयति । कीदृशीं हालाम् । अभिमतरसामिष्टास्वादाम् । स हि सुराप्रियः । रेवती तद्भार्या । तस्या लोचने एवाङ्कश्चिह्नं प्रतिबिम्बवशाद्यस्याः । भवितेति तृजन्तः । स हि कालसामान्ये। सोम इव सोम्यः । शाखादिभ्यो यत् (५-३-१०३)। ।।४९।।

तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां ..... ।।५०।।

तस्मात्सरस्वतीदेशादनुकनखलं कनखलाख्यतीर्थसमीपे हिमवतः प्रसूतां जाह्नवीं यायाः । कीदृशीम्? सगरात्मजानां षष्टिसहस्रसंख्यानां स्वर्गार्थं सोपानपङ्क्तिं निःश्रेणिमालाम् । तत्प्राप्तावुपायत्वात् । ते हि पाताले कपिलेन रोषाद्दग्धा भगीरथावतारितया भागीरथ्याप्लावितभस्मानस्त्रिदिवमापुः । या च देवी भुवमवतरन्ती गौरीवक्त्रभ्रुकुटिरचनां दिण्डीरैरवहस्येव सपत्नीव शंभोः केशग्रहणमकरोदिति युवतिधर्मारोपः। इन्दौ लग्ना ऊर्मय एव हस्ता यस्याः सा । करेण हि केशाकर्षणं क्रियते । मत्संनिधावेवानया केशा गृह्यन्त इति गौर्या भ्रुकुटिबन्धः । केशेषु धारणाद्गङ्गायाः

केशग्राहित्वम् । सा हि स्वर्गात्पतन्ती हरेण जटाग्रे धृतेत्यागमः । भृकुटिवद्भ्रूकुटिशब्दः संयोगादिरप्यस्तीति न वृत्तभङ्गः । ।।५०।।

तस्याः पातुं सुरगज इव ब्योम्नि पूर्वार्धलम्बी ..... ।।५१।।

तस्या जाह्नव्या अमलस्फटिकधवलमुदकं त्वं चेत्पातुं तर्कयेः पश्येस्तत्प्रवाहे प्रसरन्त्या भवतश्छायया कान्त्या सपदि तत्क्षणं सा गङ्गास्थानोपनतयमुनासंगमेवाभिरामा स्यात् । प्रयागादन्यत्रापि संपन्नकालिन्दीसमागमा यथा रम्या भवेत् । त्वत्प्रतिबिम्बस्य यमुनाकारत्वात् । कीदृशस्त्वम्? सुरगज इवैरावणवन्नभसि पूर्वार्धेनोत्तरभागेण लम्बते यः स पूर्वार्धलम्बी । ।।५१।।

आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां ..... ।।५२।।

तस्या एव खनद्याः प्रभवं जनकमचलमद्रिं हिमवन्तमासाद्य तदीयशिखरे स्थितस्त्वं हरवृषशिरोवदारितकर्दमसदृशीं मनोहरां शोभां वक्ष्यसि धारयिष्यसि । तस्य वृषभसितत्वात्तव च पङ्ककालत्वात् । कीदृशमचलम्? मृगाणां कस्तूरिकाकुरङ्गणा-मुपविष्टानां नाभिगन्धैः सुगन्धीकृतशिलम् । तुषारैर्हिमैर्गौरं शुभ्रम् । तुहिनशीतलत्वाच्च शृङ्गस्य मार्गखेदनिवर्तकत्वम् । प्रभवत्यस्मादिति प्रभवः । ।।५२।।

तं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा ..... ।।५३।।

तं नगं यदि दावानलो बाधेत दहेत्तदेनमग्निं त्वमासारेण वेगवद्वर्षेण निर्वापयितुमर्हसि । यस्मान्महतामृद्धय आपन्नार्तिप्रशमनफलाः । यदि ह्यार्तानामापन्न विनाश्यते तत्किं समृद्ध्या प्रयोजनम् । कीदृशो दवाग्निः । वाते वहति सति सरलस्कन्धसंघट्टजन्मा देवदारुविटपसंयोगसमुत्थितः । तरुसंघट्टवशाद्धि दावानलो जायते। तथोल्काभिर्ज्वालाभिर्दग्धचमरीवालभारः । ।।५३।।

ये त्वां मुक्तध्वनिमसहनाः कार्यभङ्गाय तस्मि .... ।।५४।।

त्वां च गर्जन्तं तत्राद्रौ ये शरभाख्याः सत्त्वा दर्पोत्सेकान्मदोद्रेकादसहमानाः सन्तोऽलङ्घ्ध्ययमपि लङ्घयिष्यन्ति जिघृक्षन्ति तांस्त्वं तुमुलकरकावृष्टिहासावकीर्णान्विष-मोपलवर्षस्मिताच्छादितानूकुर्वीथाः । अशन्या बाधेथा इत्यर्थः । न तच्चित्रं यत्ते नश्यन्ति । यतो निष्फल आरम्भे यत्नो येषां ते तथाविधाः के परिभवस्य स्थानं पात्रं न भवेयुः । अवश्यं ते परिभूयन्त इत्यर्थः । त्वदाक्रमणेच्छा शरभाणां निष्फला । तव ग्रहीतुमशक्यत्वात् । ।।५४।।

तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौलेः ..... ॥५५॥

तत्र हिमवति दृषदि शिलायामर्धेन्दुमौलेः शिवस्य व्यक्तं चरणन्यासं प्रकटां पादमुद्रां त्वं भक्त्या प्रणतः परीयाः प्रदक्षिणीकुर्याः । यस्मात्तस्मिन्नवलोकिते क्षपितकिल्बिषाः सन्तः श्रद्दधाना भक्ताः करणविगमादूर्ध्वं देहपातादनन्तरमस्य देवस्य स्थिरगणपदप्राप्तये कल्पन्ते । अनश्वराः प्रमथाः संपद्यन्ते । अत एव सदा सिद्धैर्निवेदितो-पहारम् । इन्दोरर्धमर्धेन्दुर्मौलौ शेखरे यस्य सोऽर्धेन्दुमौलिः । कलामात्रधारित्वेऽपि संस्थानापेक्षमर्धत्वम् । इणः परिपूर्वस्य लिङः सिपि परीया इति रूपम् । करणानी-न्द्रियाणि विद्यन्ते यत्र तत्करणं वपुः । अर्शआदिभ्योऽच् (५-२-१२७। ॥५५॥

शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः ..... ॥५६॥

तव ध्वनिः कन्दरासु गुहासु निर्ह्रादी घूर्णमानो मुरज इव यदि भवेत्तत्र हरस्य संगीतार्थो गुणनिकावस्तु समस्तोऽखण्डो भावी भविष्यति । अन्या हि तत्र सामग्री विद्यते । तथा हि कीचका वंशा वातैरुद्धूता मधुरं शब्दायन्ते ध्वनन्ति । भाविताभिश्च किंपुरुषाङ्गनाभिस्त्रिपुरदाहाख्यं काव्यं गीयते । त्वदीयश्च शब्दप्रतिबिम्बो मुरजनिभो यदि स्यात्तत्संगीतार्थः पशुपतेस्तत्र भावी समस्तः । शब्दं कुर्वन्ति शब्दायन्ते। निर्ह्रादी गम्भीरः । ॥५६॥

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान्विशेषान् ..... ॥५७॥

प्रालेयाद्रेर्हिमवत उपतटं पर्यन्ते तास्तान्विशेषांश्चरणन्यासादीनद्भुतानतिक्र-म्योल्लङ्घ्य यत्क्रौञ्चाद्रेश्छिद्रं हंसानां द्वारभूतं विद्यते तेन रन्ध्रेण त्वं कौबीरीमाशामभिसरेर्गच्छेः। तिर्यग्य आयामो विस्तारस्तेन शोभमानः । अतश्च बलिवञ्चनोत्थितम्य विष्णोः श्यामश्चरण इवेत्युपमा । कीदृग्रन्ध्रम् । भृगुपतिः परशुरामस्तदीयस्य यशसो वर्त्म प्रसरणमार्गः । तेन क्रौञ्चस्य भज्यमानत्वात् । प्रालेयं हिमम् । अतिक्रम्येति परावरयोगे चेति त्का (३-४-२०)। ॥५७॥

गत्वा चोर्ध्वे दशमुखभुजोच्छ्वासितप्रस्थसंधेः ..... ॥५८॥

ऊर्ध्वमनन्तरं गत्वा कैलासाद्रेरतिथिः स्याः । तां गच्छेरित्यर्थः । कीदृशस्य। दशमुखभुजोच्छ्वासितप्रस्थसंधेः पौलस्त्यबाहुदलितसानुबन्धस्य । स हि तेन दर्पादुन्मूलयितुमिष्टोऽभूत् । तथा सुरललनानां दर्पणस्यादर्शनिभस्य । स्फाटिकत्वेन मुखावलोकनात् । यश्च कैरवधवलैरुन्नतैः शिखरैर्नभो व्याप्य स्थितः । अतश्चोत्प्रेक्षते। अनुक्षपं पुञ्जीभूतः शिवस्याट्टहास उद्धतस्मितमिव । ॥५८॥

उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे ..... ॥५९॥

त्वयि शिखरस्थिते सति तस्य कैलासस्यानिमिषलोचनदृश्यां भाविनीं शोभामुत्प्रेक्षेऽहम् । तस्य कस्येव? अंसन्यस्ते स्कन्धप्रावृते मेचके कृष्णे वस्त्रे हलधरस्येव। मेघस्य कालत्वात् । स्निग्धभिन्नाञ्जनाभेऽरूक्षपिष्टकज्जलनिभ इति मेघविशेषणम् । तस्य तु तत्क्षणच्छिन्नदन्तिदन्तखण्डवलक्षस्य । गौरोऽपि शुभ्रः । ॥५९॥

हित्वा नीलं भुजगवलयं शंभुना दत्तहस्ता ..... ॥६०॥

तस्मिंश्च केलिपर्वते कैलासे शिवेनालम्बितकरा पार्वती यदि पादचारेण चरणाभ्यां विहरेच्चङ्क्रम्येत तदस्यास्त्वमारोहणेषु सोपानत्वं कुर्याः । यतो भङ्गो भक्त्या तरंगविच्छित्त्या कल्लोलाकारेण विरचितदेहः । अत एव तत्सुखपदस्पर्शं पारुष्याभावाच्छीतलत्वाच्च चरणप्रीतिकारि । स्तम्भितं निश्चलो कृतमन्तरुदरे जलं येन । अन्यथा हि पादसादः स्यात् । भयंकरत्वादेव नीलं सर्पकटकं हित्वा त्यक्त्वा। पादाभ्यां चारी गमनं पादचारः ॥६०॥

तत्रावश्यं जनितसलिलोद्गारमन्तःप्रवेशान् ..... ॥६१॥

तत्राद्रौ जनितसलिलोद्गारं वर्षन्तं त्वामभ्यन्तरप्रवेशान्निश्चितं त्रिदशवनिता नाकयुवत्यो यन्त्रधारागृहत्वं नेष्यन्ति प्रापयिष्यन्ति । यदि किलानिलवशाद्वेश्ममध्ये निक्षिप्ती विरलं वर्षसि तदा त्वमेव यन्त्रधारामयं गृहं संपद्यसे । ग्रीष्मे हि संतापनिवारणायाढ्या धारागृहान्कुर्वते । एवं सति घर्मे लब्धस्य तव ताभ्यः सकाशात्केलिलम्पटाभ्यो यदि त्यागो मोक्षो न स्यात्तत्कर्णकटुकैर्गर्जितैस्ता भाययेस्त्रासयेः। यथोद्विज्य त्वां मुञ्चेयुरिति भावः । उद्गारः प्रसरः । ॥६१॥

हेमाम्भोजप्रसवि सलिलं मानसस्याददानः ..... ॥६२॥

छायया प्रतिबिम्बेन भिन्नो द्विधाभूतस्त्वं सितमणिनिर्मलं तं पर्वतं निर्विशेरुपभुञ्जीथाः । उपभोगमाह । कीदृशास्त्वम्? हेमाम्भोजानि सुवर्णपद्मानि प्रसूते जनयति यत्तदुदकं मानससंबन्ध्याददानो गृह्णन् । प्रसवोऽत्र गौणः । तथा कामात्स्वेच्छात एवैरावणस्य क्षणं मुखपटप्रीतिं कुर्वन् । गजा हि मुखपटेन प्रीयन्ते । सजलपृषतैस्तोयकणयुक्तैरनिलैः सुरतरुवासांसि धुन्वन्दोलयन् । धुनोतेः सौवादिकस्य ह्रस्वान्तस्याभ्युपगमाद्धुन्वन्निति रूपम् । ॥६२॥

तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुगूलां ..... ॥६३॥

तत्र कैलासे दृष्ट्वास्मत्पुरीमलकां न न ज्ञास्यसे । अपि तु निःसंदेहं

वेत्स्यस्येव यथा नूनमियं सालकेति । यतस्तस्याद्रेरुत्सङ्गेऽङ्के स्रस्तं भ्रष्टं गङ्गैव दुगूलमम्बरं यस्यास्ताम् । जाह्नवी हि तत्र वहति । या चालका वः काले युष्माकं समये वर्षाख्येऽभ्रवृन्दं वहति । कीदृशम्? सलिलमुद्गिरति स्रवतीति सलिलोद्गारम् । कर्मण्यण् (३-२-१)। का यथा कीदृशं किं वहतीत्याह । मुक्ताजालालंकृतमलकं यथा कामिनी बिभर्ति । सापि प्रियस्योत्सङ्गे स्रस्तदुकूला भवति । सलिलस्य मुक्ताजालमुपमानम् । अभ्राणां ललाटकेशाः । उच्चैर्विमाना प्रांशुगृहा । कामचारिन्निति मेघस्य जडत्वं निराकृतम् । ।।६३।।

विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः ..... ।।६४।।

यत्रालकायां प्रासादा गृहास्तैरुच्यमानैर्धर्मैर्भवन्तं तुलयितुमलमनुकर्तुं शक्ताः। तथा हि त्वां विद्युत्वन्तं सतडित्कं तेऽपि ललितवनिताः सविलासाङ्गनाः । त्वां सेन्द्रचापं ससुरायुधं तेऽपि सचित्राः सालेख्याः । त्वां स्निग्धगंम्भीरघोषं मधुरधीरध्वनितं तेऽपि संगीताय गुणनिकार्थं प्रहतमुरजा वादितमृदङ्गाः । त्वामन्तस्तोयं तेऽपि मणिमयभुवः स्फाटिकावनयः । त्वां तुङ्गमुन्नतं तेऽत्यभ्रंलिहाग्रा व्योमस्पृक्शिखराः । एवं सर्वसादृश्यम् । अभ्रं खं लेढि व्याप्नोतीत्यभ्रंलिहमग्रं येषाम् । वहाभ्रे लिहः (३-२-३२)। तुलिरदन्तोऽपि । ।।६४।।

हस्ते लीलाकमलमलकं बालकुन्दानुविद्धं ..... ।।६५।।

यत्र चाङ्गनानामिदमिदमृतुषट्कजातमग्राम्यमाभरणम् । किं किमित्याह । करे लीलाकमलं विलासनलिनम् । अलकं बालैः कुन्दकुसुमैरनुविद्धं संमिश्रम् । मुखलक्ष्मीरपि रोध्रपुष्पपरागेण पाण्डुतां गौरत्वं प्रापिता । चूडापाशे नवं सरसं कुरवककुसुमम् । कर्णयो रम्यं शिरीषकुसुमम् । सीमन्ते च त्वदुपगमजं प्रावृषेण्यं नीपपुष्पम् । तद्धि वर्षासु जायते । तदेतेन तथाभूतेन कनकालंकारनिरासेन नागरत्वमङ्गनानामुक्तम् । ।।६५।।

यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि ..... ।।६६।।

यस्यामलकायां नित्यं वरपुरंध्रिसहिता गुह्यकेश्वराः सौधतलान्यागत्य रतिफलं न तु कलहादिजनकं कल्पवृक्षजं मधु रसं सेवन्ते । कीदृशानि स्थलानि । सितमणिमयानि स्फटिकानि । अत एव ज्योतिश्छायास्तारावलिप्रतिबिम्बान्येव कुसुमरचना पुष्पप्रकरो येषु । कदा सेवन्ते? भवत इव गम्भीरो निर्ह्रादी ध्वनिर्येषां तेषु पुष्करेषु वाद्यमुखेष्वाहतेष्वास्फालितेषु सत्सु । तदेतेन दंपतीनां सदासुखितत्वमुक्तम् । ।।६६।।

यत्र स्त्रीणां प्रियतमभुजालिङ्गनोच्छ्वासितानाम्..... ॥६७॥

यत्र पुर्यां स्त्रीणां कामिनीनां सुरतजनितामङ्गग्लानिं चन्द्रकान्तमणयो व्यालुम्पन्ति प्रशमयन्ति। कीदृशीनाम्? प्रियतमभुजालिङ्गनोच्छ्वासितानां भर्तृभुजबन्धनपीडितानाम् । कीदृशाश्चन्द्रकान्ताः? तन्तुजालेष्ववलम्बन्त इति तन्तुजालावलम्बाः । तथा त्वत्संरोधापगमविशदैर्भवदावरणनिवृत्तिनिर्मलैश्चन्द्रपादैः शशिकिरणैश्च्योतिताः स्राविताः । अत एव स्फुटजललवस्यन्दिनः प्रकटतोयकणमुचः। अतश्चाङ्गग्लानिहरत्वम् । ॥६७॥

नेत्रा नीताः सततगतिना यद्विमानाग्रभूमी ..... ॥६८॥

यत्र भवद्विधा मेघाश्चित्रेषु नवजलकणैर्नाशं विधाय जर्जरत्वाद्धूमोद्गारानुकृत्या धूमप्रसरसादृश्येन निपुणं प्रवीणं प्रासादजालैर्गवाक्षविवरैर्निष्पतन्ति निर्यान्ति । उत्प्रेक्षते। चित्रनाशेन शङ्कास्पृष्टा इव शङ्किता यथा । साशङ्कैर्हि सापराधत्वाद्व्याजेन पलाय्यते । कीदृशा जलदाः? यस्यामलकायां विमानाग्रभूमीर्नेत्रा वोढ्रा प्रेरकेण सततगतिना वायुना नीता अपवाहिताः । नयतीति नेता तेन । अतश्च वर्षणादालेख्यबाधः । जर्जराः खण्डा म्लानाः । ॥६८॥

नीवीबन्धोच्छ्वसनशिथिलं यत्र यक्षाङ्गनानां ..... ॥६९॥

यत्र यक्षाङ्गनानां चन्दनादिचूर्णमुष्टिर्दीपशान्तिधिया प्रेरितो विफलो भवति निष्फलः संपद्यते । प्रद्योतकाप्रशमात् । कदाचिदन्यत्रासौ पतितो भवेदित्याह । अर्चिस्तुङ्गान्महाज्वालान्रत्नप्रदीपानभिमुखमासाद्यापि । विफलत्वं त्वनश्वरत्वाद्रत्नार्चिषः। क्षेपस्तु वह्निदीपभ्रान्त्या । कदा विफलः? इत्याह । कामात्सुरतेच्छया चपलपाणिषु प्रियेष्वम्बरमपहरत्सु । कीदृशं वासः । नीवीबन्धस्योच्चयसंयमनस्योच्छ्वासनेन विकासेन शिथिलमदृढम् । ततश्चापलात्तदपहारः । अतश्च लज्जाव्याकुलत्वात्तासां चूर्णादिभिर्मणि-दीपप्रशमनेच्छा । ॥६९॥

गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः ..... ॥७०॥

यत्राभिसारिकाणां नैशो मार्गः प्रभातेऽमीभिः सूच्यते कथ्यतेऽनुमीयते वा। कैः? स्तनजघनभरेण गत्युत्कम्पात्केशच्युतैर्मन्दारकुसुमैः । कर्णभ्रष्टैश्च कनकनलिनैः क्लृप्तच्छेद्यै रचितविच्छित्तिविशेषैः । तथा मुक्तामणिषु लग्नः स्तनपरिमलः कुचामोदो येषां तैश्छिन्नसूत्रैर्मुक्ताहारैश्च । तदेतेन भ्रष्टाभरणाग्रहणेन समृद्धिरुक्ता । छेदनीयं छेद्यं पत्त्रलतादि । क्लृप्तशब्दे कृपो रो लः (८-२-१८)। ॥७०॥

मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं ..... ॥७१॥

यत्र पुर्यां साक्षादासीनं हरमवेत्य स्मरः षट्पदज्यं षट्पदमौर्वीकं धनुः प्रायेण त्रासान्नादत्ते । स्वव्यापारान्न कुरुत इत्यर्थः । कथं तर्हि मिथुनेष्वन्योन्यं प्रेमेत्याह । तस्य कामचापस्यारम्भो व्यापारः प्रवीणाङ्गनाविलासैरेव संपद्यते । कीदृशैः। कामिलक्ष्येषु सभ्रूभङ्गानि प्रहितानि क्षिप्तानि नयनानि येषु । तथामोघैरवन्ध्यैः कार्यकारिभिः । तदेतेन युवतिप्रावीण्यमुक्तम् । ॥७१॥

तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं ..... ॥७२॥

तत्रेवंविधायामलकायां धनपतिगृहानुत्तरेण राजराजवेश्मान्युत्तरेण तदस्माकमगारं गृहम् । अभिज्ञानान्याह । शक्रचापरम्येण तोरणेन दूरादपि दृश्यम् । यस्य चोपान्ते निकटे बालो मन्दारवृक्षोऽस्ति । कीदृशः? मदीयया प्रियया सेकादिना पोषितः । यतः कृतकतनयः पुत्रीकृतः । बालत्वाच्च करग्राह्यैर्गुच्छैर्नम्रीभूतः । उत्तरेणेत्येनबन्तः (५-३-३५)। तद्योगे च गृहानित्येनपा द्वितीया (२-३-३१)। पञ्चम्यन्तः पाठस्त्वनार्यः

वापी चास्मिन्मरकतशिलाबद्धसोपानमार्गा ..... ॥७३॥

अस्मिन्नस्मद्गृहे वापी पद्मिनी विद्यते । कीदृशी? मरकतमणिशिलाभिर्बद्धो रचितः सौपानमार्गो यस्याः । तथा स्निग्धैर्वैडूर्यमणिभिरेव नालो दण्डो येषां तैर्हैमैः सौवर्णैः पद्ममुकुलैः स्यूता प्रोता संबद्धा । वाप्यां हि पद्मैर्भाव्यम् । यस्याश्च तोये कृतवसतयो हंसास्त्वामपि प्रेक्ष्य वर्षासमयेऽपि निकटमपि मानसं सरो न ध्यास्यन्ति न स्मरिष्यन्ति । यतो व्यपगतशुचः । तत्रैवोपद्रवाभावान्निर्दुःखाः । हेमशब्दो रजतादिः (४-२-१५४)। ॥७३॥

यस्यास्तीरे निचितशिखरः पेशलैरिन्द्रनीलैः ..... ॥७४॥

यस्या वाप्यास्तीर एवंविधः क्रीडाशैलोऽस्ति । कीदृशः । पेशलैर्मनोज्ञैरिन्द्रनीलमणिभिर्निचितशिखरो बद्धशृङ्गः । कनकमयीनां च कदलीलतानां वेष्टनेन परिवलनेन प्रेक्षणीयो रम्यः । अतश्च मत्प्रियायाः कान्त इति निकटोल्लसितशतह्रदं भवन्तमालोक्य सादृश्यात्तमेवाद्रिं कातरेणाधीरेण मनसा स्मरामि । सादृश्यात्प्रियत्वाच्च स्मरणम् । कातरत्वं तु विरहवशात् । शेषत्वाविवक्षया तमित्यधीगर्थेति (२-३-५२) पष्ठ्यभावः। ॥७४॥

रक्ताशोकश्चलकिसलयः केसरश्चात्र कान्तः ..... ॥७५॥

अत्र केलिपर्वते रक्ताशोककेसरतरू पल्लवितौ स्तः । कुरवकवृक्षैर्वृतिर्वर्णिका

कण्ठी यस्य तस्य माधवीलतामण्डपस्य प्रत्यासन्नौ सविधौ । ययोश्चैकोऽशोकस्तव सख्या मद्गेहिन्या वामपादाभिलाषी । चरणप्रहारानुग्रहेण तस्य विकासात् । मया सह। अहमपि सापराधस्तदीयं पादप्रहारमभिलषामीत्यर्थः । अपरो बकुलो दोहदच्छद्मना सेकाभिलाषव्याजेनास्या मत्प्रेयस्या वदनमदिरां काङ्क्षति । तरुणीसुखासवसेकेन तस्य विकासात् । मया सह । अहमपि तदीयां वदनमदिरां काङ्क्षामीत्यर्थः । अशोकादीनां प्रशस्तत्वादुपादानम् । ॥७५॥

तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टिः ..... ॥७६॥

तयोरशोककेसरयोर्मध्ये क्रीडाबर्हिणः सौवर्णो वासार्थं यष्टिर्दण्डोऽस्ति । कीदृशी? स्फटिकमयं फलकं पीठं यस्याः सा । मूलभागे च मणिभिर्नद्धा संबद्धा। कैः? अनतिप्रौढा नातिपक्का ये वंशा वेणवस्तद्वत्प्रकाशैर्द्योतमानैस्तत्सवर्णैः। मरकतैरित्यर्थः। ते हि वंशवर्णाः । यां च यष्टिं दिनान्ते युष्माकं सुहृन्नीलकण्ठो मयूरोऽध्यास्ते श्रयते । कीदृशः मत्कान्तया शिञ्जानकनककटकमनोहरैस्तालैर्वाद्यैर्नर्तितः। शिञ्जेरात्मने पदित्वाच्छिञ्जदिति प्रयोगः प्रमादजः। अनित्यो वानुदात्तेदात्मनेपदविधिः (१-३-१२)। ॥७६॥

एभिः साधो हृदयनिहितैर्लक्षणैर्लक्षणीयं ..... ॥७७॥

हे साधो! पूर्वोक्तैरेतैश्चिह्नैश्चित्तस्थापितैर्मद्वेश्म त्वया लक्षणीयं बोद्धव्यम् । किं च द्वारपार्श्वे शङ्खपद्मौ निधी लिखितवपुषौ दृष्ट्वा लक्ष्यम् । कीदृशम्? इदानीं मद्विरहेण क्षामच्छायं कृशशोभम् । यस्माद्रवेरस्तमये नलिनं नैव निजां श्रियं पुष्णाति वर्धयति । ॥७७॥

गत्वा सद्यः कलभतनुतां शीघ्रसंपातहेतोः ..... ॥७८॥

ततस्त्वं पूर्वोक्ते रम्यसानौ क्रीडाद्राववस्थितः सन्नस्मद्वेश्माभ्यन्तरपतितां विद्युदुन्मेषदृष्टिं तडिदुद्योतनमेव दृशं कर्तुमर्हसि । यथा तां पश्यसीति भावः । किं कृत्वा? तत्क्षणं कलभतनुतामिभशिशुपेलवत्वं क्षिप्रगमनार्थं प्राप्य । महति हि देहे व्यथा जायते । कीदृशीं दृष्टिम् । अल्पाल्पा कृशप्राया भाः कान्तिर्यस्यास्ताम् । अत एव च खद्योताल्या ज्योतिर्मालिश्रेण्या यद्विलसितं स्फुरणं तत्सदृशीम् ॥७८॥

तन्वी श्यामा शिखरदशना पक्वबिम्बाधरौष्ठी ..... ॥७९॥

तां जानीयाः परिमितकथां जीवितं मे द्वितीयं .... ॥८०॥

तत्र वेश्मनि यैवंविधाङ्गना भवेत्तां त्वं मम जोवितं द्वितीयं बहिश्चरं जानीयाः।

मद्भार्यां बुध्येथाः । कीदृशी? या तन्वी कृशाङ्गी । श्यामैकवारप्रसूता । तरुणीत्यर्थः। शिखरदशना तीक्ष्णदन्ता । पक्वं यद्बिम्बफलं तद्वदधरो यस्याः सा । मध्ये क्षामा कृशोदरी । चकितहरिणप्रेक्षणी त्रस्तकुरङ्गनयना । निम्ननाभिरतुन्दिला । श्रोणीभारान्नित-म्बभारादलसगसना मन्थरयाना । स्तनाभोगेन च स्तोकं मनाङ्नम्रा नता । किं बहुना? युवतिविषये नारीमध्ये वेधस आद्या सृष्टिरिव । आदौ ह्यनुद्वेगाद्रम्यं निर्माणं भवति । तां कीदृशीम्? परिमितकथां पेशलसाषिणीम् । मयि सहचरे पत्यौ दूरीभूते दूरस्थिते सति चक्रवाकीमिवैकां केवलाम् । यां च बालाममीषु गाढोत्कण्ठादुःसहेष्वहःसु व्रजत्सु शिशिरदग्धां कमलिनीमिव विरूपां संपन्नां मन्ये जाने । वाशब्द इवार्थे । तां जानीया इत्येतदपेक्षयात्र सर्वत्र द्वितीया । ।।७९।।८०।।

नूनं तस्याः प्रबलरुदितोच्छूननेत्रं बहूनां ..... ।।८१।।

तस्या वक्त्रं निश्चितं त्वदुपसरणक्लिष्टकान्तेर्भवत्संपर्ककदर्थितशोभस्य शशिनो दैन्यं बिभर्ति विच्छायतां धत्ते । यतोऽसकलव्यक्ति न तथा प्रकटम् । कुतः? लम्बालकत्वात् । न हि विरहिणी केशान्संमार्जयति । कीदृशं तत्? प्रबलेनाविच्छिन्नेन रुदितेनोच्छूने नेत्रे यस्य । तथा श्वासपरंपराया उष्णत्वाद्भिन्नवर्णो नष्टकान्तिरधरो यस्य । हस्तन्यस्तं करविधृतम् । ।।८१।।

आलोके ते निपतति पुरा सा बलिव्याकुला वा ..... ।।८२।।

मत्प्रियैवंविधा तवालोके दर्शनपथे पुरा निपतत्यचिराद्यास्यते । एवंविधान्व्यापारान्कुर्वंती तां द्रक्ष्यसीत्यर्थः । कीदृशी? बलिव्याकुला देवपूजातत्परा । मम सादृश्यमनुकारं विरहवशात्तनु दुर्बलं भावगम्यं चित्तस्थितं लिखन्ती वा । मञ्जुवादिनीं शारिकां पञ्जरस्थां पृच्छन्ती वा । किमित्याह । हे निभृते विनीते कच्चिद्भर्तुः स्मरसि मत्पतिं ध्यायसि । यस्मात्त्वं तस्यातीव प्रिया । पुरा निपततीति यावत्पुरानिपातयोर्लट् (३-३-४)। ।।८२।।

उत्सङ्गे वा मलिनवसने सोम्य निक्षिप्य वीणां ..... ।।८३।।

धूसराम्बरेऽङ्के वीणां निधाय गेयमुद्गातुकामा वा । सालोके ते निपततीति संबन्धः । कीदृशं गेयम्? मम गोत्रं नामाङ्कश्चिह्नं यस्य । विरचितानि पदानि शब्दा यस्य । पदस्थो हि स्वरसंघातो गेयम् । मदीयनामान्वितमित्यर्थः । अस्रुभिर्नेत्रजलैरार्द्राः क्रूरास्तन्त्रीः क्लेशेन सारयित्वा योजयित्वा स्वयमपि दत्तां मूर्छनां सारणां विस्मरन्ती। चेतसोऽस्वास्थ्यात् । ।।८३।।

शेषान्मासान्गमनदिवसप्रस्तुतस्यावधेर्वा ..... ॥८४॥

गमनदिवसात्प्रवृत्तो योऽवधिर्वर्षाख्यस्तस्य शेषान्मासानवनौ भुवि विन्यस्यन्ती स्थापयन्ती । कैः? देहल्यां द्वारविशेषे द्वारपूजार्थं दत्तैः पुष्पैर्या गणना तया । रेखापदेषु पुष्पाणि दत्त्वेत्यर्थः । हृदयनिहितारम्भं मनोरथरचितं मत्संगमं वास्वादयन्त्यनुभवन्ती । कथमवगच्छस्येतादृशान्व्यापारन्कुर्वतीत्याह । यस्मादिष्टवियोगे विरहिणीनां प्रायेणैवंविधा एव विनोदाः केलयो भवन्ति । ॥८४॥

आद्ये बद्धा विरहदिवसे या शिखादाम हित्वा ..... ॥८५॥

सव्यापारामहनि न तथा खेदयेद्विप्रयोगः ..... ॥८६॥

तां सखीमुन्निद्रां सतीं त्वमतः कारणन्निशीथेऽर्धरात्रे मत्संदेशैः सुखयितुं पश्येर्न तु दिवसे । कुत इत्याह । सव्यापारत्वादहनि तां विरहो न तथा दुःखयेद्यथा रात्रौ शङ्के संभावये । यतो निर्विनोदां चित्रव्यापारदिवर्जिताम् । अत एव गुरुतरशुचमति-दुःखिताम् । कीदृशीं ताम्? एवंविधामेकां वेणीं कठोरपरुषात्कपोलफलकादघटित-करजेन पाणिना सारयन्तीमालोकार्थमपास्यन्तीम् । कीदृशीं वेणीम्? याद्ये प्रथमे विरहदिवसे वियोगदिने चूडाशेखरमपास्य तया वेष्टिता । या च नष्टशोकेन मया मोचनीया । एवं ह्येष विरहाचारः । स्नेहाभावाच्च स्पर्शे क्लिष्टां परुषाम् । त्वं कीदृशः? अवनौ भुवि न तु खट्वायां यच्छयनं तल्पं तस्यासन्ने निकटे वातायने गवाक्षे तिष्ठति यः स तथोक्तः । ॥८५॥८६॥

आधिक्षामां विरहशयने संनिकीर्णैकपार्श्वां ..... ॥८७॥

अन्यच्च कीदृशीं ताम् । आधिक्षामां चित्तपीडाकृशाम् । अत एव यादृशे तादृशे विरहशयने संनिकीर्णं क्षिप्तमेकं पार्श्वं यया । अतश्चामावस्यायां प्राचीमूले पूर्वदिङ्मुखे कलामात्रशेषां हिमांशोश्चन्द्रमसो मूर्तिमिवेत्युपमा । तथा निद्रामभिलषन्तीम्। किमर्थम्? मया सह कथं नाम स्वप्ने ममागमो घटेतेति । नयनसलिलोत्पीडेन नेत्राम्बुपूरेण रुद्धावकाशां निवृत्तप्रसराम् । ॥८७॥

निःश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीं ..... ॥८८॥

दीर्घोष्णत्वादोष्ठपल्लवदाहिनोच्छ्वासेनालकं नूनमुत्क्षिपन्तीमपास्यन्तीम् । कीदृशम्? शुद्धस्नानात्पानीयमात्राभिषेकेण परुषं रूक्षम् । यदि हि सा मङ्गलार्थं कदाचित्स्नाति तत्सुरभितैलामलकादिशून्येन तोयमात्रेण । आगण्डं लम्बत इत्यागण्डलम्बं कपोलस्पृस्तम् । तथा मया महेच्छारतैर्या निशा क्षणवदतिवाहिता तामेवोष्णैर्वाष्पैर्विरहशय्यायां रोदनेन मासमिव यापयन्तीं नयन्तीम् । ॥८८॥

पादानिन्दोरमृतशिशिराञ्जालमर्गप्रविष्टान् ..... ॥८९॥

सबाष्पत्वाद्गुरुभिर्दुःसहैः पक्ष्मभिर्लोमभिः खेदाच्चक्षुराच्छादयन्तीं स्थगयन्तीम्। कीदृशम्? पीयूषशीतलान्वातायनप्रविष्टानिन्दोः पादान्किरणान्पूर्वप्रीत्या संमुखं गतं प्रसृतम् । ततो मद्विरहेण खेदकारित्वात्तथैव संनिवृत्तम् । यद्वदेव रभसाद्गतं तद्वदेव प्रत्यागतमित्यर्थः । अतश्चाक्ष्णोः स्थगनान्न प्रबुद्धां न सुप्ताम् । नेत्रनिमीलनात्प्रबोधाभावो निद्राभावश्च स्वापशून्यतया । अतश्च साभ्रेऽहनि स्थलकमलिनीमिवेत्युपमा। सा हि साभ्रत्वान्न प्रबुद्धा दिनवशाच्च न सुप्ता । पूर्वैवात्र वाक्यत्रये क्रिया ॥८९॥

जाने सख्यास्तव मयि मनः संभृतस्नेहमस्मा ..... ॥९०॥

तस्या भवद्वयस्याया यतो मयि मनः संभृतस्नेहमतिप्रीतिमदतः कारणादित्थंभूतामेवंविधां दशामवाप्तां तामहमाद्यवियोगे तर्कयाम्युत्प्रेक्षे । न च स्नेह एव त्वयि तस्या नास्तीति वक्तुं युज्यत इत्याह । सुभगमिष्टमात्मानं मन्यते सुभगंमन्यः । तद्भावो मां नैव वाचालं यत्किंचनभाषिणं कुरुते । तस्माद्यत्तव मयोक्तमेतदशेषं तवाचिरात्प्रत्यक्षम् । अवश्यं त्वमेवंविधां तां द्वित्रैर्दिनैर्द्रक्ष्यसीत्यर्थः। ॥९०॥

सा संन्यस्ताभरणमबला पेलवं धारयन्ती ..... ॥९१॥

सा बला कृशाङ्गी कृशं देहं वहन्ती निश्चेतनमपि त्वां नवजलमयमस्रमवश्यं त्याजयिष्यति । कीदृशं गात्रम्? पेलवं कृशं सुकुमारम् । अत एव संन्यस्ताभरणं त्यक्तमण्डनम् । तथा तल्पपृष्ठे निक्षिप्तमप्यतिक्लेशेन बिभ्रती । यद्येवंविधा सा किमित्यहं रोदिमीत्याह । यस्माद्य आर्द्रान्तरात्मा सरसचित्तः स सर्वः प्रायेण करुणावृत्तिः कृपाशीलो भवति । त्वं च सजलत्वादार्द्रान्तरः । करुणा कृपैव वृत्तिर्व्यापारो यस्य स करुणावृत्तिः । कृपार्थवृत्तेः करुणाशब्दस्य भाषितपुंस्कत्वाभावान्न पुंवद्भावः (६-३-३४)। दुःखदुःखे-नेत्याधिक्ये द्विर्वचनम् । दुहेरिव मुचेरपि द्विकर्मकत्वात्त्वामस्रं मोचयिष्यतीति ॥९१॥

रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं ..... ॥९२॥

भवति निकटस्थे सति तस्या हरिणनयनाया नेत्रमुपरिस्पन्दित्वादनिमेषोत्फलनचटुलोत्पलशोभासाम्यं प्राप्स्यतीत्याशङ्के संभावयामीति शुभसूचनमत्र । स्त्रीणां हि वामाक्षिस्फुरणमानन्दमासन्नमाह । कीदृशं नयनम्? लम्बैरलकै रुद्धापाङ्गप्रसरं निवृत्तकटाक्षक्षेपम् । शोकाच्चाञ्जनस्नेहेन रहितम् । तथा मद्यस्य वर्जनाद्विस्खलितभ्रूविलासम् । ॥९२॥

वामो वास्याः कररुहपदैर्मुच्यमानो मदीयै .... ॥९३॥

त्वय्यासन्ने वामो वोरुरस्याश्चलत्वं यास्यति स्फुरिष्यति । वाशब्दो नयनस्पन्दापेक्षया विकल्पे । कीदृशोऽसौ? मामकैर्नखक्षतैर्वर्ज्यमानः । नित्याभ्यस्तं च मौक्तिककलापं विधिवैधुर्यात्त्याजित उपेक्षितः । शैत्यार्थं हि तत्र तस्य करणमभूत्। तथा सुरतसमाप्तौ मम करोपमर्दनयोग्यः । अभिनवकदलीकाण्डवच्च गौरः श्वेतः।

तस्मिन्काले जलद दयिता लब्धनिद्रा यदि स्या ..... ॥९४॥

हे जलद! तस्मिन्कालेऽर्धरात्रसमये प्रिया चेत्सुप्ता भवेत्तदेनामन्वास्य सेवित्वा त्यक्तगर्जितस्त्वं क्षणमात्रं सहस्व प्रतीक्षेथाः । मा स्म तां बोधयः । किमर्थमित्याह । मयि प्रेयसि कथंचिद्दैवात्स्वप्नप्रासादिते सति तस्या गाढोपगूढं दृढालिङ्गनं सद्यस्तत्क्षणं कण्ठच्युतभुजलताग्रन्थि गलभ्रष्टबाहुवल्लीपाशं मा भूत् । आश्लेषविच्छेदो मा स्म भवेदित्यर्थः । नूनं सा मामालिङ्गितमात्मना स्वप्ने द्रक्ष्यति । उपगूढशब्दो भावे । अन्वासनं सेवनम् । यथा । 'अन्वासितमरुन्धत्या स्वाहयेव हविर्भुज'मिति (रघु-१-५६)। 'स्थाणुं तपस्यन्तमधित्यकायाम्। अन्वास्त' (कुमार-३-१७) इति च। ॥९४॥

तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन ..... ॥९५॥

ततः सुप्तां तां मनस्विनीं निजोदकबिन्दुभिस्तुषारेण समीरणेनोत्थाप्य गम्भीरगर्जितेनैव वचसा वक्तुं प्रक्रमेथाः प्रारभेथाः । कीदृशीम्? शीतवातसंस्पर्शात्समाश्वस्तां मालतीजालकैः सह । सा हि प्रभाते विकसति । तथा भवदधिष्ठितत्वाद्विद्युद्गर्भे तडित्वति वातायने दिदृक्षया क्षिप्तचक्षुषम् । ॥९५॥

भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं ..... ॥९६॥

हे अविधवे! पतिवत्नि भावत्कस्य पत्युर्मित्रं प्रियमम्बुवाहं जीमूतं मां त्वं विद्धि जानीहि । तत्संदेशान्मनसि निहितात्तदीयं संदेशं चेतसि गृहीत्वा त्वन्निकटं प्राप्तम् । यश्चाम्बुवाहो मार्गे श्राम्यतां खेदं भजतां प्रोषितानां प्रवासिनां कदम्बकानि मन्द्रस्निग्धैर्मधुरारूक्षैर्गर्जितैस्त्वरयति प्रेरयति गृहाय । यतोऽबलानां कान्तानां वेणिमोक्षणे कबर्युन्मोचन उत्सुकान्युत्कानि । मेघालोके हि विरहो दुःसहः । यस्त्वरयतीत्यम्बुवाहापेक्षया पुंस्त्वं प्रथमपुरुषनिर्देशश्च । मित्रास्मदपेक्षया तु दुर्घटमेतत्स्यात् ॥९६॥

इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा ..... ॥९७॥

इत्थं त्वयोक्ते सति सा त्वामुद्वक्त्रा दृशा धिया चोपपद्यते तद्भूतत्वमस्येति संभाव्य विचार्यातः परमवहितैकाग्राकर्णयिष्यति । यस्मात्पुरंध्रीणां मित्रेणानीतः

कान्तोदन्तो वल्लभवृत्तान्तः संगमात्किंचिदूनः । प्रियसमागमे समाश्वासोत्पादात्प्रियसंगमनिभ इत्यर्थः । कमिब का वीक्ष्येत्याह । पवनतनयं हनूमन्तं मैथिली सीता यथा पूर्वं दृष्टवती दूतं च संभावितवती । उत्कण्ठयोच्छ्वसितं मुक्तोच्छ्वासं हृदयं यस्याः सा तथोक्ता । ॥९७॥

तामायुष्मान्मम च वचनादात्मना चोपकर्तुं ..... ॥९८॥

आयुष्मान्भवान्मदीयेन वचसा स्वयं चोपकर्तुं तामित्थं ब्रूयाद्वदेत् । यथा तव सहचरः पतिश्चित्रकूटासीनोऽव्यापन्नो जीवंस्त्वां कुशलं पृच्छतीति । किमित्युभयगतकुशलकथनमेवादावित्याह । यस्मात्सुप्रापविपत्तीनां शरीरिणामेतदेव पूर्वाशास्यं प्रथमाकाङ्क्षणीयं यत्स्वास्थ्यं नाम । आयुष्मानिति वचने कर्तृपदं न त्वामन्त्रणम् । ब्रूयादिति प्रथमपुरुषप्रयोगात् । आशास्यशब्देऽनुपसर्गाधिकारादेतिस्तुशासृव्रिति क्यबभावः (३-१-१००;१०९)। ॥९८॥

अङ्गेनाङ्गं तनु च तनुना गाढतप्तेन तप्तं ..... ॥९९॥

ततः किमित्याह? तव प्रेयान्दूरवर्ती संकल्पैरुत्कण्ठावशादङ्गेनाङ्गं विशति वपुषा त्वद्देहं प्रवेष्टुमिच्छति । त्वयैक्यं यियासतीत्यर्थः । भिन्नयोश्चैक्यं सारूप्याद्भवतीति तयोरङ्गयोस्तनु च तनुनेति पृथग्विशेषणैः सादृश्यकथनेन समानुरागतामाह । अस्रं द्रवतीत्यस्रद्रवम् । पचादित्वादच् (३-१-१३४)। कस्मादात्मना नायातीत्याह । विधुरेण विधिना रुद्धवर्त्मा । वियोगस्य वर्षभोग्यत्वात् । तनु च तनुनेति चार्थाभावात्प्रतनु तनुनेति पठनीयम् । ॥९९॥

शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्ता..... ॥१००॥

स तव प्रियो सन्मुखेनेदं वक्ष्यमाणं त्वामाह ब्रवीति । स कः । यत्किल शब्दाख्येयं प्रकटवाच्यं तदपि सखीसंनिधाने व्याजं विधाय यस्तव कर्णे वक्तुं लोलः साकाङ्क्ष आसीत् । कुतो हेतोः? आननस्पर्शलोभात् । कर्णे कथनं हि तस्य त्वन्मुखस्पर्शसुखानुभवाय । कीदृशः सः । श्रवणविषयमतिक्रान्तोऽप्राप्तः । दूरस्थत्वात् । अत एव लोचनानामगम्यो नेत्रैर्द्रष्टुमशक्यः । उत्कण्ठया विरचितानि पदानि शब्दा यत्रेति कथनविशेषणम् । ॥१००॥

श्यामास्वङ्गं चकितहरिणप्रेक्षिते दृष्टिपातं ..... ॥१०१॥

हे भीरु! कातरे तव सारूप्यमेकस्थं कष्टं क्वचिदपि न विद्यते । यदा लोक्यात्मानं समाश्वामयेयम् । तथा हि श्यामालतासु तवाङ्गमुत्प्रेक्षे । तद्वत्तनुत्वात् ।

चकितहरिणप्रेक्षणे च दृष्टिपातम् । त्रस्तसारङ्गवच्चटुलावलोकनात् । एवमुत्तरत्र यथायथं योज्यम् । कपोलकान्तिं मृगाङ्क उत्पश्यामि । मयूराणां कलापाटोपेषु कचभरम् । सूक्ष्मसरित्कल्लोलेषु भ्रूविलासान् । भीर्वित्यन्वर्थं नाम नारीणाम् । संज्ञापूर्वको विधिरनित्य (परि-९३) इति ह्रस्वगुणाभावः (७-३-१०८) ॥१०१॥

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया ..... ॥१०२॥

भवतीं प्रणयकुपितां प्रीत्या रुषितां धातुरागैः सिन्दूरादिरागैर्दृषत्स्वालिख्य प्रार्थनयात्मानं तव पादगतं कर्तुं यावदिच्छामि तावत्त्वदाकारस्य स्मरणाद्बाष्पैरसकृदुपचितैर्वृद्धैश्चक्षुषी ममाच्छाद्येते । अतश्च तस्मिन्नपि त्वदाकारे तत्रापि चित्रे क्रूरो विषमो विधिर्नावावयोः समागमं न क्षमते । ॥१०२॥

मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो ..... ॥१०३॥

हे सति! गुणवति! तव स्वप्ने दैववशात्प्राप्ताया गाढालिङ्गनायाकाशे शून्य एव प्रसारितभुजं मां वीक्षमाणानां वनदेवतानां द्रुमपल्लवेषु मौक्तिकपृथवो वाष्पकणा असकृन्न खलु न पतन्ति । अपि तु भ्रश्यन्त्येव । तादृशीं मे दशामालोक्य ता अपि कृपया रुदन्तितरामित्यर्थः । ॥१०३॥

भित्त्वा सद्यः किसलयपुटान्देवदारुद्रुमाणां ..... ॥१०४॥

हे गुणवति! शीलान्विते सरलतरूणां तत्क्षणं पल्लवकवाटानुपमृद्य तद्द्रुमसंबन्धिक्षीरस्रुतिसुगन्धयो ये हिमालयानिला दक्षिणेन प्रवृत्ता अस्यां दिशि वातुं प्रस्तुतास्ते मयाश्लिष्यन्ते । किमर्थम्? यदि किलैभिर्मारुतैः सहवासात्कदाचित्त्वदीयं शरीरं स्पृष्टं भवेत् । अतश्च । वाहि वात यतः कान्ता तां स्पृष्ट्वा मामापि स्पृशेः । बह्वे तत्कामयानस्य शक्यमेतेन जीवितुम् (वाल्मी-रामा-५-७५-८)॥ दक्षिणेनेत्येनबन्तः (५-३-३५)। ॥१०४॥

संक्षिप्येरन्क्षण इव कथं दीर्घयामास्त्रियामाः ..... ॥१०५॥

हे चञ्चललोचने! गाढोष्माभिस्तीव्रसंतापाभिस्त्वद्विरहचिन्ताभिर्मम मन इत्थं दुर्लभप्रार्थनं कृतम् । यद्यद्दुष्प्रापं तत्तदभिलषामीत्यर्थः । तथा हि दीर्घप्रहरास्त्रियामा निशा निमेष इव कथं नाम संक्षिप्येरन्गाच्छेयुः । तथा ग्रीष्ममध्याह्नादिष्वपि सकलासु दशासु दिनमतिमृदुरविप्रभं कथं स्यादिति । एतच्च दुर्लभम् । न हि निखिला क्षणदा क्षणवत्क्षीयते । न च दिनं सर्वदा मन्दातपं भवति । गाढोष्माभिरिति डाबुभाभ्यामन्यतरस्याम् (४-१-१३)। संक्षिप्येरन्निति कर्मकर्तरि । ॥१०५॥

नन्वात्मानं बहु विगणयन्नात्मना नावलम्बे ..... ॥१०६॥

आत्मावस्थां प्रतिपाद्य संप्रति कर्तव्यतामाह । हे कल्याणि! भद्रे! तत्रापि नन्वात्मानं बहुविधं विगणयञ्ञानन्स्वयमेव नावलम्बे न । अपि त्ववलम्ब एव । पामीत्यर्थः । तत्त्वमपि प्रिये कातरत्वमधैर्यं सुतरामत्यर्थं मा गमो मा यासोः । यस्मात्कस्य संसारिणो नित्यं सुखमुपनतं घटितमेकान्ततो नियमेन दुःखं वा । यत एताः सुखासुखरूपा दशा अवस्थाश्चक्रनेमिवत्कदाचिन्नोचैर्गच्छन्त्यधो यान्ति कदाचिच्चोपरि पृष्ठे । रथाङ्गधारा हि भ्रमन्ती क्रमेणाध उपरि च याति । तदुक्तम् । सुखं च दुःखं च भवाभवौ च लाभालाभौ मरणं जीवितं च । पर्यायशः सर्वमिह स्पृशन्ति तस्माद्धीरो न प्रहृष्येन्न शोचेत् ॥ नन्वभिमुखीकरणे । सा गम इति लृदित्त्वादङ् (३-१-५५)।

शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ ..... ॥१०७॥

कार्तिकशुक्लद्वादश्यां भुजगशयनाच्छेषतल्पादुत्थिते शार्ङ्गपाणौ हरौ मम शापान्तो भषिप्यति । तदैव वर्षस्य परिपूर्णत्वात् । अतश्चाद्यारभ्य मासाचतुष्टयं लोचने मीलयित्वा यथा कथंचिद्गमयातिवाहय । ततः पश्चात्संयोगे सति चिरकालगुणितं तीक्ष्णं तं तं नानाविधमात्मनोऽभिलाषं कामं परिपक्वशारदज्योत्स्नासु निशास्वावां निर्वेक्ष्याव उपभुञ्जावहे । लोचननिमीलनेनात्र यथा तथा त्वं लक्ष्यते । ॥९०७॥

भूयश्चाह त्वमपि शयने कण्ठलग्ना पुरा मे ..... ॥१०८॥

स त्वत्प्रिय एतदुक्त्वा पुनरपि त्वामिदमाह । यथा पूर्वं भवती तल्पे मामालिङ्ग च सुप्ता केनापि निमित्तेन सशब्दं रुदती विप्रबुद्धा विनिद्रा जाता । ततो रोदनहेतुमसकृत्पृच्छतो मम त्वयोक्तम् । हे कितव! धूर्त! कामपि वनितां रमयन्भवान्स्वप्ने मयावलोकितः । अत ईर्ष्याकोपेनाहमरुदमिति । ॥१०८॥

एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा ..... ॥१०९॥

हे कुवलयाक्षि! एतस्मादभिज्ञानदानान्मां स्वस्थमवेत्य कौलीनाल्लोकापवाद-मात्रान्मयि त्वमविश्वासिनी निष्प्रत्यया मा भूः । तदेव कौलीनमाह । किमपि कुतोऽपि हेतोः स्नेहान्विरहह्रासिनो वियोगे तनूभवतो जना आहुः । यथा । प्रीतिः प्रवासाश्रयादिति (भर्तृ-नीति-३३)। एतच्चायुक्तम् । यस्मात्ते स्नेहा अभोगाद्धेतोरिष्टे वस्तुनीप्सितेऽर्थ उपचितरसाः सन्तः प्रेम्णो राशीभवन्ति प्रीतिमयाः संपद्यन्ते । हृदयवल्लभविषये वियोगवशात्सहस्रगुणः स्नेहः संपद्यत इत्यर्थः । त्वयि च मम या प्रीतिस्त्वां त्वमेव जातासि । कौलीनं लोकापवादः । ॥१०९॥

कच्चित्सोम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे ..... **॥११०॥**

हे सोम्य! प्रियदर्शनैतन्मित्रकार्यं कच्चिद्भवता व्यवसितसङ्गीकृतं मम । अवश्यमत्र त्वया व्यवसायवता भाव्यम् । प्रत्याख्यातुमत्र तव धैर्यं न लक्षयामि । तथा हि त्वमर्थितः सन्नब्रुवन्नपि चातकेभ्यस्तोयं वितरसि । यस्मान्महतामर्थिष्वभिमतार्थ संपादनमेव प्रतीपवचनम् । महान्तो हि कर्मणा ब्रुवन्ति न वचसा । ॥११०॥

एतत्कृत्वा प्रियमनुचितप्रार्थनावर्त्मनो मे ..... **॥१११॥**

स एवमुक्त्वाशिषमाह - हे जलधरानुचितप्रार्थनावर्त्मनोऽननुरूपयाच्ञामार्गस्य ममैतत्संदेशहरणलक्षणं प्रियं विधाय ततस्त्वं वर्षाकालेऽर्जितदेहोन्नतिरभिमतं स्थानं विचर भ्रम । कुतो विधाय? स्नेहेन प्रीत्या । स्नेहाभावश्चेत्तद्विधुरो दुःखितोऽयमिति मयि कृपाधिया वा । किं बहुना? एवमनेन प्रकारेण मद्वत्तवापि निमेषमपि तडित्प्रियया विरहो मा भूदिति भद्रम् । ॥१११॥

इति राजानकानन्ददेवात्मज-
परमात्मचिह्नापरनाम-
वल्लभदेवविरचिता
मेघदूतविवृतिः
समाप्ता ॥

॥ अनुबन्धम् ॥

अध्वक्लान्तं प्रतिमुखगतं सानुमानाम्रकूट .....

त्वां पथि श्रान्तं संमुखागतमाम्रकूटाख्यः सानुमानुच्चेन शिरसा श्लाघया वक्ष्यति । त्वमपि तस्य वेगवर्षेण दावानलं निर्वापयेः । यस्मान्महापुरुषेषु सत्कारार्द्रः पूजार्द्र उपकारो यो विधीयते सोऽचिरेणैव फलिष्यति । अत्र महत्त्वं मेघस्य । पूर्वत्र तु पर्वतस्य । सर्वोन्नतोऽपि जलधरोऽत्र विश्राम्यतीत्यद्रेः श्लाघात्र ॥

धारासिक्तस्थलसुरभिणस्त्वन्मुखस्यास्य बाले .....

धाराभिरुदकधाराभिः सिक्तं यत्स्थलं भूस्तदिव सुरभिणः परिमलवतस्त्वन्मुखस्य त्वदाननस्य दूरीभूतं दूरस्थम् । अत एव प्रतनुमतिकृशम् । तथाभूतमपि मां पञ्चबाणः। पञ्च बाणाः शरा अरविन्दादयो यस्य सः । मन्मथः क्षिणोति बाधते । क्षिणोतेर्लट् । घर्मान्ते वै ग्रीष्मान्ते तु । वर्षाकाले त्वित्यर्थः । दिक्षु सम्यक् सक्ताः संसक्ता अप्रविरला मेदुराश्च ये घना मेघास्तैरव्यक्तः सूर्यस्यातपो येषु तानि वासराणि कथं

केन प्रकारेण व्रजेयुर्गच्छेयुर्बत कष्टं वद ब्रूहि ।।

तत्संदेशं जलधरवरो दिव्यवाचा चचक्षे .....

जलधरवरः । पुष्कलावर्तकानां वंशे जातत्वाज्जलधराणां वरः श्रेष्ठो मेघः । तस्या यक्षवध्वाः प्राणानसून्रक्षितुम् । जनाय हित इष्टः । श्रोत्रयोर्मधुर इति यावत्। रवो ध्वनिर्यस्य । तथाभूतः संस्तस्य यक्षस्य संदेशं वाचिकं पूर्वोक्तम् । संदेशवाग्वाचिकं स्यादित्यमरः । दिव्यवाचा । दिवि भवा दिव्या देवाः । तेषां वाक् । तया चचक्ष उक्तवान् । चक्षिङो लिट् । कामरूपं मघोन इति पूर्वं यक्षेणैवोक्तत्वात्तदानीं मेघो देवाकारीभूय तादृग्वाचा यक्षसंदेशं यक्षवध्वा उवाचेत्यर्थः । सा यक्षवधूरपि स्वभर्तुरुदन्तं कुशलस्यागमनस्य च वार्त्तां प्राप्य । श्रुत्वेत्यर्थः । प्रमुदितमनाः संहृष्टचित्ता सती तस्थावतिष्ठत् । तथा ह्युत्तसेषु केषां प्रार्थनाभिमतफला न स्यात् । उत्तमेषु पुरुषेषु सर्वेषां प्रार्थनाभिमतफला स्यादेवेत्यर्थः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः।।

श्रुत्वा वार्त्तां जलदकथितां तां धनेशोऽपि सद्यः .....

धनेशः कुबेरोऽपि जलदकथिताम् । जलमुदकं संतापमतप्ताय ददातीति जलदः । अनेनास्य परोपकारित्वं स्पष्टीकृतम् । जलदेन कथितामुक्तां तां तादृशीम्। सदैन्यामिति यावत् । वार्त्तां यक्षस्य वार्तां श्रुत्वा सद्यो यक्षवार्त्ताश्रवणकाल एव सदयहृदयो दयासहितचित्तः । अत एवास्तकोपः प्रनष्टयक्षविषयकरोषः सञ्शापस्यान्तमवसानं संनिधाय संनिहितं कृत्वा । कतिचिद्दिनान्यवशिष्टान्यप्यविगणय्येत्यर्थः । विगलितशुचौ निवृत्तव्यसनौ । अत एव हृष्टचित्तौ संतुष्टमानसावेतौ पूर्वोक्तौ दंपती । जाया च पतिश्च दंपती । जायाशब्दस्य जंभावो दंभावश्च निपात्यते। संयोज्याभिमतसुखान् । अभिमतं सुखं येषु तान् । अत एवेष्टानिच्छाविषयीभूतान्भोगान्भूयः पुनरपि पूर्ववत्प्रापयामास गमयामास ।।

श्रीः

Books broughtout under the guidence of Ravi MohanRao since 1992

శ్రీ బిల్వాష్టోత్తర శతనామస్తోత్రమ్	మూలం		రామోరా	10-02-1992
కటాక్షశతకమ్	సారోల్లాసినీవ్యాఖ్యా	దోర్బల విశ్వనాథశర్మ	సాధనగ్రంథమండలి	19-03-1992
సర్వేశ్వర శతకము	మూలం	యథావాక్కుల అన్నమయ్య	సాధనగ్రంథమండలి	07-05-1992
వృషాధిపశతకము	మూలం	పాల్కుర్కి సోమన	శ్రీశైలదేవస్థానం	01-05-1992
దండకషట్కము	టీకా	ప్రాచీనం	శ్రీజయలక్ష్మీ పబ్లికేషన్స్	10-06-1993
గీతగోవిందమ్	టీకా		వావిళ్ళ ప్రచురణ	ఆగష్టు - 1993
శివస్తోత్రకదంబమ్	మూలము		సాధనగ్రంథమండలి	ఉగాది - 1994
పాదారవిందశతకము-	టీకా	ఎస్.పి.లోకాచార్యులు	సాధనగ్రంథమండలి	27-02-1995
మహిషాసురమర్దినీస్తోత్రమ్	టీకా	శంకర కింకరుడు	సాధనగ్రంథమండలి	09-04-1995
ఆత్మవిద్యావిలాసమ్-సదాశివబ్రహ్మేంద్రుడు	అనువాదము	శంకర కింకరుడు	సాధనగ్రంథమండలి	24-05-1995
స్తుతిశతకమ్- (మూక పంచశతి)	అర్థాలు	వి.ఏ.కుమారస్వామి	సాధనగ్రంథమండలి	07-11-1995
మందస్మితశతకమ్ - (మూకపంచశతి)	సారోల్లాసినీ వ్యాఖ్య	దోర్బల విశ్వనాథశర్మ	సాధనగ్రంథమండలి	17-02-1996
పురాజీవశాస్త్రము	Text	రావి మోహనరావు	రావి మోహనరావు	15-08-1996
శివమీడేస్తవః	హర్షిణీ వ్యాఖ్య	దోర్బల విశ్వనాథశర్మ	రావి మోహనరావు	29-08-1996
అమరుక శతకము - శ్రీశంకరాచార్య	మనసిజ వ్యాఖ్య	దోర్బల విశ్వనాథశర్మ	సాధనగ్రంథమండలి	24-11-1996
ఆర్యాశతకమ్ - (మూకపంచశతి)	సారోల్లాసినీవ్యాఖ్య	దోర్బల విశ్వనాథశర్మ	సాధనగ్రంథమండలి	15-01-1997
శివపద మణిమాలా - నటేశనవకమ్	టీకా	శంకర కింకరుడు	సాధనగ్రంథమండలి	16-04-1997
శ్రీపరశంభుమహిమ్నఃస్తోత్రమ్	శివప్రియా వ్యాఖ్య	దోర్బల విశ్వనాథశర్మ	శ్రీశైలదేవస్థానము	01-05-1998

బిల్వాష్టోత్తరశతనామస్తోత్రమ్	శివోల్లాస వ్యాఖ్య	స్ఫూర్తిశ్రీ	సాధనగ్రంథమండలి	25-08-1998
శ్రీసుందరేశ్వరవిలాసము	కావ్యం	బ్రహ్మశ్రీ చెఱువు సత్యనారాయణశాస్త్రి		02-10-1998
హరిమీడేస్తవః - శంకరాచార్య	మచ్చర్చికా వ్యాఖ్య	దోర్బల విశ్వనాథశర్మ	విశ్వేశ్వరాశ్రమము	29-12-1998
శ్రీరుద్ర నమకమ్-చమకమ్	మూలం	-	సాధనగ్రంథమండలి	14-02-1999
Basic Principles of Hydrogeology	Text	R.M.Rao & Others	సాధనగ్రంథమండలి	10-04-1999
శ్రీ హలాయుధ శివస్తోత్రమ్	డమరుక వ్యాఖ్య	దోర్బల విశ్వనాథశర్మ	సాధనగ్రంథమండలి	04-03-2000
Basic Principles of Hydrogeology	Text (Revised)	R.M.Rao & Others	సాధనగ్రంథమండలి	22-04-2000
చండీ శతకము (బాణుడు)	ప్రసాదినీ వ్యాఖ్య	దోర్బల విశ్వనాథశర్మ	సాధనగ్రంథమండలి	08-05-2000
శ్రీసోమనాథభాష్యమ్	పాఠపరిష్కరణ	దోర్బల విశ్వనాథశర్మ	సాధనగ్రంథమండలి	09-01-2001
శివకర్ణామృతస్తోత్రమ్ (1)	ఆస్వాదినీవ్యాఖ్య	దోర్బల విశ్వనాథశర్మ	విశ్వేశ్వరాశ్రమము	21-02-2001
శ్రీ గుణరత్నకోశః (పరాశరభట్టరు)	ఆంధ్రరత్నదీపికా	కె.వి.ఆర్.నరసింహాచార్యులు	ఉభయవేదాంతసభ	02-04-2001
వేదమంత్రరామాయణమ్ (1)	తెనుగుసేత	మైత్రేయ	సాధనగ్రంథమండలి	15-08-2001
శ్రీత్రిపురామహిమ్నస్తోత్రమ్-శ్రీదుర్వాస	శ్రీనీరాజన వ్యాఖ్య	మేళ్ళచెర్వు	సాధనగ్రంథమండలి	15-08-2001
శ్రీరంగనాథ సుప్రభాతమ్	శ్రీసేవావ్యాఖ్య	ఈ.ఏ.శింగరాచార్యులు	సాధనగ్రంథమండలి	11-09-2001
శ్రీశివకర్ణామృత స్తోత్రమ్-2	ఆస్వాదినీ వ్యాఖ్య	దోర్బల విశ్వనాథశర్మ	సాధనగ్రంథమండలి	15-10-2001
గరుడదండకః-వేదాన్తదేశికప్రణీతమ్	టీకా	ఈ.ఏ.శింగరాచార్యులు	సాధనగ్రంథమండలి	26-12-2001
శ్రీ శివకర్ణామృతస్తోత్రమ్-3	ఆస్వాదినీ	దోర్బల విశ్వనాథశర్మ	శ్రీశృంగేరీశారదాపీఠం	12-03-2002
ఏకశ్లోకరామాయణమ్	మోహనరూపావ్యాఖ్య	దోర్బల విశ్వనాథశర్మ	సాధనగ్రంథమండలి	21-04-2002
స్తుతిశతకమ్ (మూకపంచశతి)	సారోల్లాసినీవ్యాఖ్య	దోర్బల విశ్వనాథశర్మ	సాధనగ్రంథమండలి	21-04-2002

శ్రీరంగనాథుని అభిషేకచూర్ణికలు	శ్రీసేవావ్యాఖ్య	ఈ.ఏ.శింగరాచార్యులు	సాధనగ్రంథమండలి	31–08–2002
వేదమంత్రరామాయణమ్–2	తెనుగుసేత	మైత్రేయ	సాధనగ్రంథమండలి	15–10–2002
అద్వైత విజయః (బెల్లంకొండ)	ఆంధ్రానువాదము	మేళ్ళచెర్వు	రావి కృష్ణకుమారి	31–10–2002
శ్రీమదనన్తస్తవః/కె.ఎస్.రామానుజాచార్యులు	శ్రీసేవావ్యాఖ్య	ఈ.ఏ.శింగరాచార్యులు	ఉభయవేదాంతసభ	08–11–2002
అష్టక పంచకమ్ – బెల్లంకొండ	టీకా	మేళ్ళచెర్వు	సాధనగ్రంథమండలి	27–12–2002
అద్వైతామృతం – వేదాన్తనిశ్చయః	ఆంధ్రానువాదం	మేళ్ళచెర్వు	సాధనగ్రంథమండలి	27–12–2002
శ్రీమద్ధయవదన శతకమ్	హేషావ్యాఖ్య	ముళ్ళపూడి విశ్వనాథశాస్త్రి	రావి కృష్ణకుమారీ	14–01–2003
అమలనాదిపిరాన్	శ్రీసేవావ్యాఖ్య	ఈ.ఏ.శింగరాచార్యులు	సాధనగ్రంథమండలి	02–04–2003
సిద్ధాంతబిందుః – బెల్లంకొండ	సంస్కృతమూలం	తెలుగులిపి	రావి కృష్ణకుమారి	24–05–2003
భాగవతచతుశ్లోకీ	చాతురీ–మేళ్ళచెర్వు మంత్ర – దోర్బల	సంస్కృతవ్యాఖ్య – బెల్లంకొండ	సాధనగ్రంథమండలి	19–08–2003
జగన్నాథ సుధాలహరీ + ఋగ్వేదసూర్యసూక్తమ్	పావనీవ్యాఖ్య	ఇ.వి.యస్.మూర్తి	సాధనగ్రంథమండలి	21–09–2003
రామకృష్ణవిలోమకావ్యమ్/సూర్యకవి	ద్విరసనాఖ్యయా	మేళ్ళచెర్వు	సాధనగ్రంథమండలి	25–10–2003
శ్రీరమావల్లభరాయశతకమ్/బెల్లంకొండ	పీఠిక – తి త ఉ వు	మేళ్ళచెర్వు	సాధనగ్రంథమండలి	27–12–2003
చిద్గగనచంద్రిక–1 కాళిదాసు	విశ్వలహరీవ్యాఖ్య	దోర్బల విశ్వనాథశర్మ	సాధనగ్రంథమండలి	15–01–2004
శ్రీశివమానసికపూజాస్తుతిః	టీక	శంకరకింకరుడు	సాధనగ్రంథమండలి	17–03–2004
ఋతుసంహారః కాళిదాసు	మృణాళినీవ్యాఖ్య	రామోరా	రావి కృష్ణకుమారీ	04–05–2004
కావ్యాలంకారః (భామః)	బాలానందినీవ్యాఖ్య	పుల్లెల శ్రీరామచంద్రః	సంస్కృతభాషా ప్రచార సమితి	28–11–2004

ఘటకర్పరకావ్యమ్	మంజరీవ్యాఖ్య	రామోరా/దుర్గానంద	రావి కృష్ణకుమారీ	01–04–2005
తిరుప్పావై	టీక	ఈ.ఏ.శింగరాచార్యులు	సాధనగ్రంథమండలి	18–04–2005
బీజతంత్రమ్	సంకలనం	మేళ్ళచెర్వు	రామోరా	08–06–2005
శ్రీమద్భాగవతమహాపురాణము (సప్తమ)	టీక	చదలవాడ జయరామశాస్త్రి	సాధనగ్రంథమండలి	27–08–2005
సంస్కృతనిఘంటుః ద్విరూపకోశం	సంకలనం	చింతా సుందరరామశాస్త్రి	రామోరా	15–08–2005
స్తన్యధారాస్తవః (సంస్కృతం)	–	మేళ్ళచెర్వు	రామోరా	23–01–2006
పుష్పబాణవిలాసః (కాళిదాసు)	శృంగారచంద్రిక	వేదం వేంకటరాయః	రావి కృష్ణకుమారీ	26–02–2006
ధర్మమంజరీ (బెల్లంకొండ)	ఆంధ్రానువాదము	ధర్మపురి శేషగిరిశర్మ	సాధనగ్రంథమండలి	01–05–2006
మేఘధూతం (కాళిదాసు)	మృణాళినీవ్యాఖ్య	రామోరా	రామోరా	18–06–2006
కళ్యాణచంపుః – ముల్గు పాపయా	సంస్కృతం – పీఠిక	నిష్టల సుబ్రహ్మణ్యం	సంస్కృతభాషా ప్రచార సమితి	21–09–2006
వాగ్దేవీ స్తుతిః (భోజరాజు)	కచ్ఛపీ వ్యాఖ్య	మేళ్ళచెర్వు	రావి కృష్ణకుమారీ	15–10–2006
శ్రీలాలిత్యము	–	దోర్బల విశ్వనాథశర్మ	సాధనగ్రంథమండలి	15–10–2006
ముక్తిద్వారాస్తవం–ముల్గుపాపయాధ్యుడు	ఉద్ఘాటినీ వ్యాఖ్య	మేళ్ళచెర్వు	రావి మోహనరావు	15–10–2006
ఆంధ్ర వాఙ్మయ చరిత్ర –1	–	గోగినేని యోగప్రభావతీదేవి	తెలుగుగోష్ఠి	20–03–2007
శ్రీమద్భాగవతమహాపురాణమ్ (అష్టమ)	టీకా	చదలవాడ జయరామశాస్త్రి	సాధనగ్రంథమండలి	22–04–2007
అభీతిస్తవము (వేదాంతదేశికః)	శ్రీసేవావ్యాఖ్య	ఈ.ఏ.శింగరాచార్యులు	రామోరా	15–01–2008
శ్రీమద్రమావల్లభరాయశతకం (బెల్లంకొండ)	సంస్కృత మల్లికావ్యాఖ్య	మేళ్ళచెర్వు	సంస్కృత భాషా ప్రచార సమితి	21–02–2008

ఆత్మవిద్యావిలాసము– సదాశివ బ్రహ్మేంద్రుడు	ఆంధ్రానువాదము	శంకరకింకరుడు	శ్రీలలితానందాశ్రమము	03-09-2008
మూకపంచశతి	సారోల్లాసినీవ్యాఖ్య	దోర్భల విశ్వనాథశర్మ	రావి కృష్ణకుమారి	23-02-2009
భైరవస్తోత్రమ్ – అభినవగుప్తుడు	టీకా	శిష్టిలక్ష్మీకుమారశర్మ	బ్రహ్మేంద్రాశ్రమము	21-03-2009
స్వయంవరకళాస్తోత్రం	వ్యాఖ్య	నిష్టల సుబ్రహ్మణ్యం	సదాశివబ్రహ్మేంద్రాశ్రమం	30-04-2009
కరుణాలహరీ–జగన్నాథుడు	నాగమాతావ్యాఖ్య	ఈ.ఏ. శింగరాచార్యులు	రామోరా	02-05-2009
విజ్ఞానదీపిక (పద్మాపాదాచార్య)	ఆంధ్రానువాదం	చింతగుంట సుబ్బారావు	శ్రీలలితానందాశ్రమము	15-06-2009
విజ్ఞానదీపిక (సంస్కృతం)	వివృతివ్యాఖ్య	శ్రీపద్మపాదాచార్య	సంస్కృతభాషాప్ర॥స॥	23-07-2009
శ్రీసూక్తివ్యాఖ్యానమ్	పదపరిచర్యావ్యాఖ్య	ఈ.ఏ. శింగరాచార్యులు	సదాశివబ్రహ్మేంద్రాశ్రమము	17-10-2009
బహుళాశ్వచరిత్ర–దామర్ల	పీఠిక	ఉన్నం జ్యోతివాసు	స్వప్న పబ్లికేషన్స్	28-12-2009
A Luminous Flame	Sri Aurobindo's 'Savitri'	ప్రేమానందకుమార్	సదాశివబ్రహ్మేంద్రాశ్రమము	05-12-2009
శివలీలావిలాసము–తిమ్మకవి	పీఠిక	ఉన్నం జ్యోతివాసు	స్వప్న పబ్లికేషన్స్	12-02-2010
కైవల్యనవనీతం	టీకా	విద్యానందనాథుడు	సదాశివబ్రహ్మేంద్రాశ్రమము	12-02-2010
శ్రీరామచరితం	వచనం	గాలి గుణశేఖర్	రావి కృష్ణకుమారి	24-03-2010
సాంబపంచాశికా	మయూఖమాలినీవ్యాఖ్య	మేళ్ళచెర్వు	రావి కృష్ణకుమారి	24-03-2010
కబీరువాణి	అనుసృజన	శ్రీమతి సూర్యదేవర లలితారాణి	సదాశివబ్రహ్మేంద్ర ఆశ్రమము	18-05-2010
శ్రీశంకరాశంకరభాష్యవిమర్శః (సం॥)	మూలం	–	బెల్లంకొండరామరాయ ట్రస్ట్	24-05-2010

కుమారసంభవమహాకావ్యమ్-1	మృణాళినీవ్యాఖ్య	రామోరా	రామోరా	01-09-2010
సుభద్రాపరిణయము (జగ్గకవి)	మూలం	-	రావి కృష్ణకుమారి	05-09-2010
కుమారసంభవమహాకావ్యమ్-2	మృణాళినీవ్యాఖ్య	రామోరా	రామోరా	11-12-2010
కుమారసంభవమహాకావ్యమ్-3	మృణాళినీవ్యాఖ్య	రామోరా	రామోరా	08-05-2011
కుమారసంభవమహాకావ్యమ్-4	మృణాళినీవ్యాఖ్య	రామోరా	రామోరా	21-08-2011
శ్రీకృష్ణచరితం	వచనం	గాలి గుణశేఖర్	రావి కృష్ణకుమారి	22-08-2011
కుమారసంభవమహాకావ్యమ్-5	మృణాళినీవ్యాఖ్య	రామోరా	రామోరా	26-10-2011
కుమారసంభవమహాకావ్యమ్-6	మృణాళినీవ్యాఖ్య	రామోరా	రామోరా	05-01-2012
శ్రీవిజ్ఞానభైరవతంత్ర	కీటభ్రమరణావ్యాఖ్య	మేళ్ళచెర్వు	రామోరా	20-02-2012
శ్రీశివగీతా	శ్రీఫలమంజరీవ్యాఖ్య	మేళ్ళచెర్వు	రావి కృష్ణకుమారి	24-05-2012
రాఘవయాదవీయం-వేంకటాధ్వరి	హరిప్రియావ్యాఖ్య	గరిమెళ్ళ	రామోరా	30-06-2012
కథాకాసారము	వచనం	సౌభాగ్య	రామోరా	03-07-2012
కుమారసంభవమహాకావ్యమ్-7	మృణాళినీవ్యాఖ్య	రామోరా	రామోరా	18-12-2012
శ్రీభగవద్గీత	మంజరీద్విపద	తెలుగుఅనువాదం	మురకొండ నాగేశ్వరరావు	05-12-2012
మైరావణచరిత్రము	పీఠిక-టిప్పణి	గరిమెళ్ళ	రావి మోహనరావు	03-06-2013
రఘువంశః - 1	మృణాళినీవ్యాఖ్య	రామోరా	రామోరా	29-08-2013
దశావతారస్తోత్రమ్	వ్యాఖ్య	ఈ.ఏ.శింగరాచార్యులు	రావి మోహనరావు	09-09-2013
వరాహోపనిషత్తు	రసావ్యాఖ్య	మేళ్ళచెర్వు	లలితానందాశ్రమం	09-09-2013
శ్రీమదాంధ్రమహాభాగవతము	ఏకాదశస్కంధం-	కోవూరి పట్టాభిరామశర్మ	పుష్పగిరిపీఠం	05-09-2013

	పద్యకావ్యం			
శ్రీదేవీఖడ్గమాలా	సంకలనం	రామోరా	రావి మోహనరావు	14-10-2013
శ్రీహయగ్రీవసహస్రనామావళిః	సంస్కృతవ్యాఖాసహితా	బెల్లంకొండ.రామరాయకవి	సాధనగ్రంథమండలి	31-01-2014
కనకధారాస్తవము-శంకరాచార్య	జాతవేదావ్యాఖ్య	మేళ్ళచెర్వు	సాధనగ్రంథమండలి	27-02-2014
శ్రీశివకర్ణామృతస్తోత్రమ్	ఆస్వాదినీవ్యాఖ్య	దోర్భలవిశ్వనాథశర్మ	రావి మోహనరావు	27-02-2014
రఘువంశః - 2	మృణాళినీవ్యాఖ్య	రామోరా	రామోరా	27-02-2014
శివతాండవస్తోత్రం - రావణ	టీకా	శంకరకింకరుడు	రావి కృష్ణకుమారి	10-03-2014
శివమీడేస్తవః	హర్షిణీవ్యాఖ్య	దోర్భల విశ్వనాథశర్మ	రామోరా	08-04-2014
శంకరాశంకరభాష్యవిమర్శః (తెలుగు)	ఆంధ్రానువాదము	మేళ్ళచెర్వు	లలితానందాశ్రమము	08-04-2014
అశ్వధాటీకావ్యమ్	నవవీథీవ్యాఖ్య	గరిమెళ్ళ	రామోరా దంపతులు	23-05-2014
శ్రీసదాశివబ్రహ్మేంద్ర కీర్తనాని	టీక	శంకరకింకరుడు	శ్రీలలితానందాశ్రమం	09-05-2014
శివసహస్రనామస్తోత్రమ్ (సం॥)	మూలం	-	రామోరా	10-06-2014
హయగ్రీవ స్తోత్రాణి	టీక	ఈ.ఏ.శింగరాచార్యులు	సాధనగ్రంథమండలి	28-07-2014
లలితారహస్యసహస్రనామస్తోత్రమ్	మూలం సంస్కృతం	భట్టనారాయణ	రామోరా	01-08-2014
శ్రీవిష్ణులహరి	అమృతధారావ్యాఖ్య	గరిమెళ్ళ	రామోరా	23-10-2014
బెల్లంకొండ రామరాయ-శ్రీమద్భగవద్గీతా 'భాష్యార్క'	ప్రకాశికానువాదము	మల్లావజ్ఝల వేంకట సుబ్బరామశాస్త్రి	రావి కృష్ణకుమారి	02-12-2014
వల్లీపల్లవోల్లాసము (మాడభూషి)	పీఠిక	ఉన్నం జ్యోతివాసు	రామోరా దంపతులు	17-02-2015
వేదాంతముక్తావళి-సంస్కృతం	దినకరీవ్యాఖ్యసహితా	బెల్లంకొండ రామరాయకవిః	రావి కృష్ణకుమారి	02-06-2015

బీజాక్షరనిఘంటువు	సంకలనం	మేళ్ళచెర్వు	యోగపీఠం, గుంటూరు	22-07-2015
ఋతుసంహారః – 2nd Edition	మృణాళినీవ్యాఖ్య	రామోరా	రావి కృష్ణకుమారి	15-08-2015
ధనుంజయ నిఘంటుః	పీఠిక	వుయ్యూరు లక్ష్మీనరసింహారావు	రావి మోహనరావు	26-08-2015
వివాహసంస్కారము	–	–	శ్రీలలితానందాశ్రమం	05-09-2015
శ్రీపరశంభుమహిమ్నఃస్తోత్రమ్ 2nd Edition	శివప్రియావ్యాఖ్య	దోర్బల విశ్వనాథశర్మ	రావి కృష్ణకుమారి	05-09-2015
ముక్తిద్వారాస్తవ రత్నరాజము–	(ముల్గుపాపయ) ఉద్ఘాటినీవ్యాఖ్య	మేళ్ళచెర్వు	రావి మోహనరావు	22-10-2015
వేదాంతముక్తావళీ – 2	దినకరి అనువాదం	మేళ్ళచెర్వు	లలితానందాశ్రమం	22-10-2015
ఆంధ్రకుమారసంభవం (సాంబశివకవి)	పీఠిక	గరిమెళ్ళ	పుష్పగిరి పీఠం	22-10-2015
కుండలినీస్తవః (రుద్రయామళమ్)	టీకా	చింతగుంట సుబ్బారావు	రావి మోహనరావు	22-10-2015
ఒకతేజోమయజ్వాల – శ్రీ అరవిందుల సావిత్రి	ఆంగ్లమూలానికి తెనుగు సేత	చింతగుంట సుబ్బారావు	రావి మోహనరావు	05-12-2015
మేఘదూతం	మృణాళినీవ్యాఖ్య	–	రావి మోహనరావు	15-12-2015
* అన్నమయ్యకౌముది	వ్యాఖ్య	డా॥తాడేపల్లి పతంజలి	రావి కృష్ణకుమారి మోహనరావు దంపతులు	26-12-2015
* వివర్ణాదివిష్ణుసహస్రనామమ్	సంస్కృతవ్యాఖ్యాసహితం	బెల్లంకొండరామరాయకవి	రావి మోహనరావు	ఫిబ్రవరి 2016
* భాగవతచమ్పూః	సంస్కృతవ్యాఖ్యాసహితం	బెల్లంకొండరామరాయకవి	రావి మోహనరావు	ఆగష్టు 2016

❁ ❁ ❁

అభినందన పద్యదశకము

కు॥ శ్రీవాగ్దేవీశుభపద
సేవాసక్తహృదయాబ్జ! శివకరకార్యా!
శ్రీవిద్యామార్గానుగ!
భూవిద్వద్వినుత! రావి మోహనరాయా! 1

తే॥గీ॥ సంస్కృతాంధ్రభాషాగ్రంథసంతతులకు
నవ్యముద్రణగౌరవభవ్యగతులు
కలుగఁజేయుచు నున్నావు పలువిధాల
సారసారస్వతవరివస్య యిది మిత్ర! 2

ఉ॥ పండితమండలిన్ గలసి, భద్రకృతుల్ గణియించి, వారిచే
మెండుగ వ్రాయఁజేసి కడు మేలగు వ్యాఖ్యలు, వాని నచ్చులో
నిండుమనమ్ముతోడ నిల నిల్పిన శ్రామికనేత వీవు స
త్పండితవంద్య! నీయశము భవ్యము నవ్యము రావి మోహనా! 3

చ॥ స్వయముగ నీవు కొన్నిటికి వ్యాఖ్యలు వ్రాసి, ధనవ్యయమ్ము నో
ర్చి, యతులితశ్రమమ్మునకుఁ జిత్తమునందుఁ జలింపకుండ ని
ల్చి, యఖిలపాఠకుల్ ముదముచెందెడిరీతిని నచ్చువేసి, మం
చియశముఁ దాల్చుచుంటివి విశిష్టవిధానవిధేయ! మోహనా! 4

సీ॥ వేదాంతసద్గ్రంథవిశ్రుతశ్రేణికిన్
వెలుఁగు లిచ్చితి వీవు వేనవేలు
కమనీయగుణపూర్ణకావ్యవనాలకున్
నవజీవనము నిచ్చినావు మేలు
స్తోత్రరత్నాలకున్ శుభటీక లిప్పించి
జగతి కిచ్చితి వీవు సరసగతులఁ
గోరినరీతిలోఁ గోశరాసుల నహో!
పంచినావు కదా! ప్రపంచమునకు

గీ॥ రావి వంశాబ్ధిచంద్రమా! రమ్యహృదయ!
ప్రథితగుణగేయ! మోహనరాయనామ!
నీయశశ్చంద్రికావళుల్ నిఖిలదిశల
సాగుచున్నవి వాగ్దేవి సంతసింప. 5

ఉ॥ నీవలె భారతిన్ గొలుచునిర్మలభక్తులు తెన్గునేలపై
నీవిపరీతనాగరికహేలలవేళను నల్గురైదుగుర్
భావనచేయ నుందు రని పల్కెదఁ, బల్వురు మాత్ర ముండ రో
పావనవాఙ్మయాధ్వరశుభంకర! సంస్కృతసాహితీపరా! 6

క॥ భూగర్భశాస్త్రి వగు నిను
వాగర్థసమర్చనమును వ్రతముగఁ దాల్పన్
ఏ గురువులు శాసించిరొ?
బాగిది బాగిద్ది రావివంశాబ్ధిశశీ! 7

తే॥గీ॥ అమరభాషలోఁ గలనాల్గు వ్యాఖ్యలకును
దెలుఁగున మృణాళినీవ్యాఖ్య దీర్చి చేర్చి
మేఘసందేశకావ్యమ్ము మేల్తరముగ
నాంధ్రజాతికి నిచ్చిన యాద్యుఁ డెవఁడు?
రావి వంశాబ్ధిచంద్రమా! నీవు దక్క. 8

క॥ సల్లలితకృతిని దీనిని
బుల్లెల శ్రీరామునకును బూజ్యున కిడుటల్
చెల్లును బెల్లుగ నౌచి
త్యోల్లాసవిరాజమానముత్తమహృదయా! 9

ఉ॥ ఇరువదిమూఁడు వత్సరము లేగెను మోహన! నీవు గ్రంథముల్
సురుచిరపద్ధతిన్ విబుధశూరుల కిచ్చెడి యజ్ఞమందహో!
వరుసగ నూటముప్పదియుఁ బైని గణింపఁగ నాఱు గ్రంథముల్
కరములయందు నిల్చెను జగమ్మునఁ గ్రొత్తవి నేఁటివారికిన్. 10

సారస్వతమిత్రుఁడు

డా॥ వుయ్యూరు లక్ష్మీనరసింహారావు
చరవాణి : 9573884352

Notes